CC-0. In Public Domain. Digitization by eGangotri

EDUCATION DEPARTMENT PUNJAB.

THIRD SANSKRIT READER.

तृतीयं संस्कृत-पुस्तकं ।

RAI SAHIB M. GULAB SINGH & SONS
Mufid-i-Am Press
LAHORE

11th Edition 1935 Price 0:2-7

1,500 Copie

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कृत की तृतीय पुस्तक

पाठः १

जलम् ।

घर्मार्त (घाम से सताया हुआ)

व्यजन (पंखा) क्थन (उबालना)

अङ्गार (गरम कोयला) निर्झरयन्त्र (पानी झरने की कल) निर्जल (सूखा) ।

घर्मार्तं यथा शीतलं जलं व्यजनस्य वातश्च सुखयति, न तथाऽन्यत् किञ्चित् । परं लोकोऽस्योत्कर्षमजानन् यथोचितं नाद्रियते ।

स्वच्छे वारिणि स्वादो वर्णो गन्धश्च नास्ति । पानाय स्नानाय च निर्मलस्यैव जलस्य प्रयोगः कर्तव्यः । इदं जलं पेयमस्ति न वेति वर्णेन स्वादेन गन्धेन च ज्ञायते । मलिनं जलं क्थनेनाङ्गाराणां पातनेन निर्झर-यन्त्रेण च शुध्यति । यच्च भोजनं निर्जलं प्रतीतं भवति तदपि जलमयमेव ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इनका संस्कृत में अनुवाद करो:—

स्वच्छ पानी बेरंग, बेज़ायका और बे बू होता है। वह पीने और नहाने के लिए अच्छा पानी बरतता है। अस्वच्छ पानी को शुद्ध करने की तीन रीतियां हैं:— उबालना, बुझाना और टपकाना।

—००—

पाठः २

दुग्धम्

विहाय (छोड़कर)	नवनीत (मक्खन)
दुग्ध (दूध)	महिषी (भैंस)
अलम् (बहुत, काफ़ी)	
एकविध (एक जैसा)	अजा (बकरी)
अंश (भाग)	निष्कासन (निकालना)

अन्यमाहारं विहाय दुग्धमेव जीवितस्यावलम्बनायालम्। अस्माकं धारणाय पोषणाय च यदभिलषितं तत्सर्वं दुग्धेऽस्ति। केषाञ्चित् पशूनां दुग्धं प्राय एकविधमेवास्ति। पयसः पञ्चांशानां मध्ये जलस्य चत्वारोंऽशा भवन्ति। तस्मिन् किञ्चिद्नवनीतमप्यस्ति। अस्मिन्नदेशे महिषीणां गवामजानाञ्च दुग्धानि लोका

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यवहरन्ति । क्वथनेन पात्राद् वायोर्निष्कासनेन च दुग्धं यथातथं रक्ष्यते ॥

इनका संस्कृत में अनुवाद करो—

आदमी केवल दूध पी कर जी सकता है ।

दूध में धारण पोषण के लिये सब चीजें पाई जाती हैं ।

दूध में मक्खन थोड़ा सा और पानी बहुत होता है ।

लोग गाय भैंस और बकरी का दूध पीते हैं ।

दूध को उबाल कर और बर्तन में से हवा निकाल कर किसी और बर्तन में भर लो ।

पाठः ३

परस्परमालापः ।

आलाप (बातचीत) यान (सवारी, गाड़ी)

किं क्रियते भवद्भिः ? मया निजपितुः सकाशं पत्रं लिख्यते । पुनर्युष्माभिः सह वायोः सेवनार्थं पुराद्बहिर्गन्तुमिच्छामि । श्रीमद्भिस्तु स्वयाने गन्तव्यं मया चाश्वस्य पृष्ठे । आवामत्रागतानां राज्ञां मनोहरां शोभां दृष्ट्वा स्वगृहं प्रत्यागम्य वार्तालापस्य सुखमनुभविष्यावः, येन मार्गस्य श्रान्तिरपि दूरी भविष्यति ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इनका संस्कृत में अनुवाद करोः—

मैं अपने भाई को चिट्ठी लिखता हूँ। चिट्ठी लिखने के बाद हम बाहर हवा खाने जायँगे। जब तू घोड़े पर सवार होगा, मैं अपनी गाड़ी में जाऊँगा। देखो महाराजाओं के तंबू हैं।

पाठः ४

गुरुः शिष्यश्च।

तापमान (वह यन्त्र जिस से सर्दी गर्मी जानी जाय)

उष्णता (गरमी) पारद (पारा)

अंश (दरजा) विपर्य्ययः (उलटा)

किमिदमिति शिष्येण गुरुः पृच्छ्यते। इदं तापमानं यन्त्रमस्ति। किं प्रयोजनं साध्यतेऽनेन? शीतस्योष्णतायाश्चानुमानं भवत्यनेन। अस्मिन् किमपि श्वेतं वस्तु प्रतीतं भवति, तत् किम्? अयं पारदोऽस्ति। एतानि चिह्नानि तापस्य द्योतका अंशाः कथ्यन्ते, यदा तापो वर्धते, तदा पारद उपर्यागच्छति। एतस्य विपर्य्यये पारदो नीचैर्गच्छति॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इनका संस्कृत में अनुवाद करोः—

शिष्य गुरु से क्या पूछता है ?

इस यन्त्र से गरमी सरदी जाँचते हैं।

इस यन्त्र में पारा है।

पारा ऊपर आता है और नीचे गिरता है।

पारे के ऊपर नीचे होने से ताप का बढ़ना घटना मालूम होता है॥

पाठः ५

अन्धः साधुः

मृगया (शिकार)	पुमस् (पुरुष)
जाङ्गल (जंगली जीव)	कौलीन्य (कुलीनता)
सुपरिस्फुटं (स्पष्ट)	निर्णयार्थम् (निश्चय करने के लिये)

कश्चिद् राजा मृगयामनुसरन् मार्गे काश्चिदन्धं साधुं दृष्ट्वा तमिदमपृच्छत् "साधो महाशय ! इतो गतो जाङ्गलो भवद्भिर्दृष्टः किम् ?" साधुरवदद् "राजन् ! यस्यामेव दिशि गतस्तस्यामेव भवद्भिरपि गन्तव्यम्।" पुनर्मन्त्रिणागत्य स एव साधुः पृष्टः "साधो ! युष्माभिःराजा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जाङ्गलश्च दृष्टौ किम् ?" तेन कथितम् "आं मन्त्रिन् अस्यामेव दिशि युष्माभिर्गमनीयम् ।" पुनश्च दास आगच्छत् तमेव साधुमपृच्छच्च–"रे अन्ध ! राजा मन्त्री जाङ्गलश्च त्वया दृष्टाः किम् ! साधुस्तं प्रत्युवाच– "आं दास ! अस्यामेव दिशि गच्छ ।"

इदानीं त्रयः परस्परं मिलित्वाऽवदन्–"अन्धेन साधुना कथं वयं ज्ञाताः ?" एतस्य निर्णयार्थं ते साधोः समीपमुपागच्छन् । साधुनोक्तं वाग्भिरेव मया सर्वं ज्ञातम् । सत्यमुक्तम्—

यावन्न कथ्यते पुंभिर्वचः सज्जनसन्निधौ ।
तावन्न ज्ञायते तेषां कौलीन्यं सुपरिस्फुटम् ॥

इनका संस्कृत में अनुवाद करो:—

राजा ने उसे पूछा कि शिकार किधर गया ?

अन्धे ने मंत्री से कहा कि आप इस तरफ जाएँ ।

तीनों मिल कर अन्धे साधु के पास गये और पूछा कि तुमने हमें क्योंकर पहचान लिया ?

'यह पुरुष भला है या बुरा' यह उसकी वाणी ही से जाना जाता है ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाठः ६

किं मे नामास्ति ।

वत्स (बच्चा)	रजत (चाँदी)
दीप्त (चमकती हुई)	हिरण्मय (सुनहरी)
वातायन(गवाक्ष,झरोखा)	व्योमन् (आकाश)
रश्मि (किरण)	विवर (बिल)
चारु (सुन्दर)	कन्दरा (गुहा, गुफा)

हे वत्स ! कोऽहमस्मि, मम नाम च किम् इति वद । यदाऽहं पूर्वस्यां दिशि उदेमि तदा दिनं भवति । दीप्तेन हिरण्मयेन चक्षुषाऽहं तव वातायने त्वां पश्यामि, तवोत्थानकालं च द्योतयामि । मयि प्रकाशमाने त्वया न शयितव्यम्, परं शयनादुत्थाय किंचित् पठनादि कर्म कर्तव्यं वायुसेवनाय बहिर्गन्तव्यं वा । महान् पथिकोऽहम् । आकाशे भ्रमामि, न कदापि तिष्ठामि विश्राम्यामि वा । श्रान्तश्च कदापि न भवामि ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अहं निजशिरसि दीप्यमानानां रश्मीनां मुकुटं धारयामि, स्वकिरणांश्च सर्वतः प्रेषयामि। अहं वृक्षाणां गृहाणां जलानाञ्चोपरि प्रकाशं करोमि। मयि प्रकाशमाने सति सर्वमेव चारु दृश्यते। अहं तुभ्यं प्रकाशं तापं च ददामि। फलानि धान्यादीनि च पचामि। आकाशेऽत्युच्चैर्निवसामि। वृक्षेभ्यो मेघेभ्योऽप्युन्नतरोहम्। यद्यहं तव समीपमुपागच्छेयम्, त्वां परिदहेयं मारयेयश्च, तृणान्यपि भस्मीकुर्य्याम्।

क्वचिदहं स्वकीयं दीप्तं रश्मीनां मुकुटमपनयामि। शिरोऽपि तनुषु रजतवत् श्वेतवर्णेषु मेघेष्ववगुण्ठयामि। तदा त्वं मां द्रष्टुं क्षमः। परं मेघानामभावे मध्यान्हे च सकलेन तेजसा मयि दीप्यमाने सति त्वं मां द्रष्टुमसमर्थो भवसि। तदाऽहं दुष्प्रेक्ष्यो भवामि, चक्षुस्तेजांसि प्रतिहन्मि च। तस्मिन् काले गृध्र एव मां द्रष्टुमर्हति गृध्रस्तत् सदैव निजेन स्थिरेण दूरदर्शिना चक्षुषा बद्धलक्ष्येण मां निरीक्षितुं शक्नोति।

यदाऽहं प्रातरुत्तिष्ठामि, दिनञ्च करोमि। तदैव भारद्वाजपक्षीव्योम्नि मां मिलितुमुड्डीयते, मधुरञ्च गायति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कुक्कुटश्चोच्चैः स्वरेण प्रत्येकं ममागमनं कथयितुं रौति। परमुलूकाः चर्मचट्यश्च मां दृष्ट्वोड्डीना भवन्ति । प्राचीनासु भित्तिषु वृक्षाणां कोटरेषु स्वदेहान् गोपायन्ति । सिंहा व्याघ्राश्च स्वाविवराणि कन्दराणि च प्रविशन्ति, यत्र ते सर्वमहः निर्भरं शेरते ।

अहं सर्वत्र प्रकाशं करोमि । अतीव सुन्दरो महोज्ज्वलश्चास्मि सकलायां भूमौ ।

हे वत्स ! इदानीं वद, कोऽहमस्मि, किञ्च मे नामास्ति ?

[क] १. सूर्य्यः कदा कस्याञ्च दिशि उदेति ?

२. कस्मात् स महान् पथिक आख्यायते ?

३. स कुत्र प्रकाशते ?

४. यदि स पृथ्वी समीपमागच्छेत्, तदा किं भवेत् ?

५. किमर्थं वयं तं निर्भरं द्रष्टुमशक्ताः ?

६. कः पक्षी तं निर्भरं द्रष्टुं शक्नोति ?

७. के पक्षिणः सूर्येण सममुत्तिष्ठन्ति ?

८. के जन्तवः सूर्य्यस्य प्रकाशाय द्विषन्ति ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(ख) १. अपनयामि, शक्नोति, प्रविशन्ति, शेरते—ये क्या हैं ? इन धातुओं के लिट् और विधिलिङ् के प्रथम पुरुष के रूप लिखो।

२. अप, प्र, परि, नि—इन उपसर्गों के लगाने से जो धातु के अर्थ बदल जाते हैं, उनके उदाहरण देकर स्पष्ट वर्णन करो।

३. 'भस्मीकुर्य्याम्' यह कैसा धातु है ? ऐसा और धातु बताओ।

४. 'चक्षुस्तेजांसि, बद्धलक्ष्येण, इनमें समास विच्छेद करो और इसकी व्याकरण-व्यवस्था बताओ।

(ग) इनका संस्कृत में अनुवाद करो:—

मेरे सिर पर किरणों का ताज है।
मैं चारों तरफ़ फिरता हूँ और खेतियों को पकाता हूँ।
दुपहर को मुझे कोई नहीं देख सकता।
मेरे देखने से आँखें चुँधिया जाती हैं।
उल्लू और चमगादड़ मुझे देखते ही उड़ जाते हैं॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाठः ७

वैद्यो मद्यपश्च ।

मद्यप (शराबी) भिन्नसन्धान (टूटी हुई का जोड़ना)
भिषज् (वैद्य, हकीम) ।
अन्तरा (बिना) व्यज्यते (प्रकट होती है)
श्वस् (आने वाला कल) प्रज्ञा (अक़ल, बुद्धि)
पेटिका (पिटारी, पिटार)

केनचिद् मद्यपेनात्मनो देहोऽतीव रोगग्रस्तीकृतः। तं मद्यपं युवानमवलोक्यैकेन वैद्येनोक्तम्—"यदि भवान् मद्यपानं न त्यक्ष्यत्यवश्यमेव मरिष्यति, यत इदं यूने पुरुषाय विषवदिति ।"

तच्छ्रुत्वा यूना मद्यपनोक्तम्—"महाशय ! एवन्तु कदापि न भविष्यति । यतोऽयं मम स्वभावः संजातः, प्रत्यहमेकं पानपात्रमन्तरा मम निर्वाहो न भवति । कश्चित्कालं विचिन्त्य वैद्य उवाच—वरम्, अधुनाऽहं गच्छामि, श्वोऽन्यमुपायश्चिन्तयित्वाऽऽगमिष्यामीति ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयेऽह्नि एकां विचित्रवर्णां सुन्दरैः कर्करैः पूर्णां पेटिकामादायाऽऽगच्छत्, अवदच्च प्रिय ! प्रत्यहमेकं कर्करमस्याःपेटिकाया निष्कास्य स्वपानपात्रे प्रक्षिप्य यदि त्वं मद्यं पिवेस्तदा तत् तव शरीरस्य हानिकारकं न भविष्यतीत्युक्त्वा गतवान् । मद्यपस्तथैवाकरोत् । एवं कृतवतस्तस्य पानपात्रे मद्यस्य बिन्दवो न्यूनाः संजाताः; परं स एतन्नैव ज्ञातवान् । यदा प्रतिदिनं कर्करप्रक्षेपणेन पानपात्रं कर्करैः पूर्णतामगच्छत्तदा स सुरापानतोन्यवर्तत, ज्ञातवांश्चातिनिपुणवैद्यानां चातुर्यं चिकित्सारीतिञ्च ।

मन्त्रिणां भिन्नसन्धाने भिषजां रोगनाशने ।
कर्मणि व्यज्यते प्रज्ञा स्वास्थ्ये को वा न पण्डितः ।

(क) वैद्येन रोगिणो मद्यपानं कथं त्याजितम् ?

(ख) १. कर्करप्रक्षेपणम्. विचित्रवर्णाम्, भिन्नसन्धाने— इनमें समासच्छेद करो ।

२. त्यक्ष्यति, मरिष्यति, भविष्यति--इनके धातु और लकार बताकर लिट् लकार के उत्तम पुरुष के रूप बताओ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. आदाय, निष्कास्य, प्रक्षिप्य इनके धातु प्रत्यय और उपसर्ग बताओ, इनसे अन् प्रत्यय के रूप बनाओ। इन उपसर्गों के अर्थ बताओ और इन्हें और धातुओं पर लगाकर उनके अर्थ करो॥

(ग) इनका संस्कृत में अनुवाद करो:—

अगर तुम शराब पीना छोड़ दोगे, तो तुम स्वस्थ हो जाओगे।

शराब पीना मेरी आदत हो गई है।

यह एक प्याली रोज पिये बिना नहीं रह सकता।

एक कंकर रोज प्याली में डाल लिया करो और उसमें रहने दो।

फिर शराब पीने से तुम्हें कुछ हानि न होगी॥

पाठः ८

लघुचेतस उदारचेतसश्च।

लघुचेतस् (ओछा)

उदारचेतस् (उदार चित्त वाला)

अनुसन्धान (निश्चय वा खोज)

अपकर्ष (छुटाई)

अपकार (बुराई)

प्रतिफल (बदला)

उत्कर्ष (बड़ाई)

प्रतिवासी (पड़ौसी)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अस्मिञ्जगति द्विविधा जना दृश्यन्ते। लघुचेतस उदारचेतसश्चेति। ये सर्वेषु विषयेषु दोषाणामेवानुसन्धानं कुर्वन्ति, कर्मकर्तुरतितुच्छमप्यपराधं दृष्ट्वातीव क्रुध्यन्ति, समानव्यवसायिभ्यश्च सदैवासूयन्ति, परेषामतिवृद्धां श्रियं दृष्ट्वा कातरा भवन्ति, सामान्यमप्यपकारं सदैव स्मरन्ति, समयं प्राप्यापकारकर्तुरपकारस्य प्रतिफलं दातुं सदैवोद्युक्ता भवन्ति स्वोत्कर्षं परापकर्षञ्च सदैवोद्घोषयन्ति, इमे जगति लघुचेतसो गण्यन्ते, परमाधमास्ते ।

येषां मनसि सहसा क्रोधो नोत्पद्यते, जातोऽप्यधिककालं न तिष्ठति, कस्मिंश्चित्कर्मणि स्वयं विफलप्रयत्ना अपि तस्मिन्नेव कार्य्येऽन्यं सफलप्रयत्नं पश्यन्तश्चामोदं प्राप्नुवन्ति, प्रतिवासिभ्यः कदापि न द्विषन्ति, अज्ञानेनासावधानतया वा केनचित्कृतमप्यपराधं सहसा मार्जयन्ति, स्वाभिलषितं साधयितुं परवञ्चनादिं गर्हितमुपायमन्वेष्टुं कदापि न यतन्ते, धार्म्मिकं सच्चरित्रमतिसामान्यमपि जनं सादरं निरीक्षन्ते, तस्य सम्मानमेव कुर्वन्ति, परेषामनिष्टाचरणेऽ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पवादे च तेषां कदापि रुचिर्नोत्पद्यते, त उदारचेतसो महात्मानो महानुभावाश्च प्रस्तूयन्ते । जगति येषु पुरुषेष्वेतेऽसामान्या गुणाः सन्ति तेऽतिविरला भवन्ति ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ॥

(क) १. जगति कति विधा जना अस्यां कथायां पठिता-स्तेषां नामानि संक्षिप्तलक्षणानि च वद ।

२. सहसा केषां चित्ते क्रोधो नोत्पद्यते, के च स्वस्योत्कर्षं न घोषयन्ति, अज्ञानकृतापराधं सहसा के मार्जयन्तीति सविस्तरं लिख ।

३. सादरं निरीक्षन्ते । परेषामनिष्टकरणे कदापि सयत्ना न भवन्ति । अनयोर्वाक्ययोः पदच्छेदं कृत्वा तात्पर्यं वद ॥
अस्याः कथायास्तात्पर्यं वद ।

(ख) १. क्रोधो नोत्पद्यते । जातोप्यधिककालं न तिष्ठति—इन वाक्यों में सन्धिच्छेद करो ।

२. दृश्यन्ते, क्रुध्यन्ति, गणयन्ते, द्विषन्ति—इनके धातु बनाकर लङ् मध्यम पुरुष बहुवचन के रूप लिखो ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. स्वोत्कर्ष, परापकर्ष, विफलप्रयत्न—इन पदों के अर्थ खोल कर लिखो।

(ग) इनका संस्कृत में अनुवाद करोः—

ठगी आदि बुरे उपाय सोचने का यत्न नहीं करना। उदार पुरुष अच्छे सच्चरित लोगों का आदर करते हैं। उनके मन में क्रोध उपजता ही नहीं, उपजे भी तो उसी दम हट जाता है।

पाठः ६

दान-महिमा।

प्रथमो भागः

ग्रास (ग्राही) काकिणी (कौड़ी, दमड़ी)
विभव (विभूति) श्रुति (शास्त्र)
ईश्वर (धनी) विवेकज्ञ (समझ-सोच करने वाला)
भूरि (बहुत) आनन्त्य (अनन्तता)

ग्रासादपि तदर्धार्धङ्कस्मान्नो दीयतेऽर्थिषु।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥१॥
ईश्वरा भूरिदानेन यल्लभन्ते फलङ्किल।
दरिद्रस्तच्च काकिण्या प्राप्नुयादिति नः श्रुतिः ॥२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सत्पात्रं महती श्रद्धा देशकालं यथोचितम् ।
यद्दीयते विवेकज्ञैस्तदानन्त्याय कल्पते ॥३॥
दाता लघुरपि सेव्यो भवति न कृपणो महानपिसमृद्ध्या ।
कूपोऽन्तःस्वादुजलः प्रीत्यै लोकस्य न समुद्रः ॥४॥

(क) १. इसके अर्थ करोः—

तदानन्त्याय कल्पते ।

२. तदार्धार्धम् , इच्छानुरूपः, विवेकज्ञः, स्वादुजलः— इन समस्त पदों को खोल कर अर्थ करो ।

(ख) दीयते, भविष्यति, कल्पते इनके धातु और लकार बताओ ।

(ग) इनका संस्कृत में अनुवाद करोः—
खाने में से कुछ थोड़ा सा भूखे को देना चाहिये । थोड़ा सा भी देने से निर्धन को वही फल प्राप्त होता है, जो बहुत देने से धनी को होता है । कृपण के पास चाहे कितना ही धन हो जाए, उसे कोई बड़ा नहीं कहेगा ।

द्वितीयो भागः

इन्दु (चाँद)	कुल-पर्वत (बड़ा पहाड़)
धराधर (बादल)	प्रलय (संहार, नाश)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भुवन (लोक)	दुर्भिक्ष (अकाल)
	अनौचित्य (अनुचितपन)

कलाभिदुः करं दाता धारां धाराधरो यदि ।
सङ्कोचयिष्यते तर्हि जीविष्यति कथं जगत् ॥५॥
संग्रहैकपरः प्राप्तः समुद्रोपि रसातलम् ।
दाता तु जलदः पश्य भुवनोपरि गर्जति ॥६॥
समुद्राः स्थितिमुज्झन्ति चलन्ति कुलपर्वताः ।
प्रलयेऽपि न मुञ्चन्ति दातारोऽङ्गीकृतं तु यत् ॥७॥
तरुदाहोतिशीतेन दुर्भिक्षमतिवर्षणात् ।
अतित्यागादनौचित्यं नाति कुत्रापि शोभते ॥८॥

(क) छठे और सातवें श्लोक का अर्थ करो और तात्पर्य्य बताओ ।

(ख) संग्रहैकपरः, भुवनोपरि, तरुदाहः—इनके समास विच्छेद करो ।

(ग) इनका संस्कृत में अनुवाद करो--
जो दाता ही देने से हाथ उठाले, तो संसार किस तरह जीएगा ?
बड़े आदमी कभी सत्य से नहीं हटते, चाहे इधर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

की दुनिया उधर हो जाए।
'अति' हर एक बात में बुरी है॥

पाठः १०

कर्त्तव्यपालकः।

सङ्घट्टन (टक्कर)	वाष्पशकटी (रेलगाड़ी)
चालनयन्त्र (काँटा)	सद्य एव (उसी दम)
पुत्रान्तिक (पुत्र के पास)	सुवर्णपदक(सोने का तमग़ा)

एकदैकस्मिन् देशे कस्याश्चिद् वाष्पशकट्याः पथि समक्ष एवायान्तीमन्यां वाष्पशकटीमवलोक्य द्वयोः परस्परं सङ्घट्टनेन जनानां नाशो न भवेदिति हेतोस्तामायान्तीं वाष्पशकटीमन्यस्मिन् पथि चालयितुमेको भृत्यस्तस्थौ। स चैतावतापश्यद् यत्तस्याल्पवयस्कः पुत्र आयान्त्यास्तस्या एव वाष्पशकट्या-मार्गे क्रीडति। तत्र स तं रक्षितुं न कमप्युपायं कर्तुमशक्नोत्॥

पलाय्य पुत्रं निगृह्य निष्कासयितुं शक्तोऽप्यन्यस्मिन् मार्गे चालनयन्त्रेण शकटीं चालयितुं न समर्थः। यतोऽ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तीवाल्पसमये कार्य्यद्वयं नैव भविष्यतीति विचार्य्य द्वयोःशकट्यो सङ्घट्टनेन बहुजनविनाशं शङ्कमानः स्वकर्त्तव्यञ्च विचिन्त्य, पुत्रमरणजं शोकं विहाय शकटीमेवान्यस्मिन्मार्गे चालितवान् । चालनकाले चोच्चैः स्वपुत्रमकथयत् यच्छीघ्रमेव स्वदेहंशकट्याः पथि पातय । तच्छ्रुत्वाज्ञाकारी पुत्रः सद्य एव शकटी-मार्गेऽपतत् । वाष्पशकटीमग्रे चालयित्वा स्वकर्त्तव्यं समाप्य भृत्यः पुत्रान्तिकमुपागच्छत् । पुत्रञ्च तथैव सावधानं स्वस्थं चावलोक्य परां मुदमगच्छत्, ईश्वरस्य धन्यवादमकरोच्च ।

इदं तस्य सुचरितं दृष्ट्वा श्रुत्वा च लोकाः प्रसन्ना अभवन्, तस्य स्वाम्यपि तस्यातीवोदारां वार्तां लोकेभ्यः श्रुत्वा समक्षे तन्मुखादपि सकल वृत्तमु-पश्रुत्य तस्मै बहुधनमेकं च सुवर्ण-पदकं पुरस्कार-त्वेनायच्छत्, अकथयच्चास्यैव शुभ कर्मणः फलमेतद् यज्जीवन्तमेव सुतं पुनः प्राप्नुयाः । तदुक्तम्—

पृष्ठतः सेवयेदर्कं जठरेण हुताशनम् ।
स्वामिनं सर्वभावेन परलोकममायया ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(क) १. कर्त्तव्यपालकस्य भृत्यस्य कर्त्तव्यं किमासीत् ?
२. कथं किमुक्त्वा तेन स्वपुत्रः शकटीतो रक्षितः ?
३. कथं पुत्रमरणजःशोकोऽपहृतः, कस्मात् कारणाच्च ?
४. तत्कर्मणा परितुष्टेन स्वामिना तस्मै किं दत्तं कथितं च किम् ?

(ख) १. वाष्पशकटी, पुत्रमरणजं शोकम्, स्वदेहम्, इन शब्दों का तात्पर्य खोल कर लिखो।
२. प्राप्नुयाः किस धातु से बना है ?
३. पुत्रः, जीवन्तम्, क्या क्या विभक्तियाँ हैं ? इनके उसी विभक्ति के बहुवचन क्या हैं ?

(ग) अन्तिम श्लोक का गद्य रूप बनाओ।

(घ) इनका संस्कृत में अनुवाद करोः—
उसी सड़क पर आती हुई रेलगाड़ी टकरा न जाय, इसलिए एक नौकर वहां खड़ा था। जल्दी से लड़के ने अपने आपको गाड़ी के नीचे गिरा दिया।

पाठः ११ ।

सूक्ष्मबुद्धिरारण्यकः

सार्थभ्रष्ट (साथ से बिछुड़ा हुआ) | आरण्यक (वनवासी)
राजगृह (कचहरी) | उभयत्र (दोनों तरफ़)
पिपीलिका (चिउँटी)।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कुत्रचिदरण्ये सार्थ-भ्रष्टमुष्ट्रमन्विष्यन्तौ वणिजौ कश्चिदारण्यकं वने भ्रमन्तमपश्यतामपृच्छतां च किं-भोः ! त्वं सार्थाद् भ्रष्टमुष्ट्रमपश्यः ? तच्छ्रुत्वा सोऽवदत् स उष्ट्रः किमक्ष्णा काणः,अधोदन्तेन हीनः, पृष्ठतः पार्श्वद्वये भारेणाक्रान्तः, एकस्मिन् पार्श्वेऽन्नमन्यतोमाक्षिकमिति । तयोरेकोऽवदत्, बाढम् ,कुत्र सः ? दर्शय तं कृपया , आरण्यकेनोक्तं नाहं दृष्टवान् कथं दर्शयामि ।

अथारण्यकस्ताभ्यां ताडितो राजगृहं प्रति नीतः । न्यायकारिभिः कथितश्च कथमुष्ट्रं न दर्शयासि भोः ? आरण्यकोऽवदत् मया तु नैव दृष्ट उष्ट्रः, कथं दर्शयेयम् ? पुनस्तेऽकथयन् कथं तर्हि तस्य सर्वाणि चिह्नान्यकथयः । आरण्यकः किंचित् विहस्यावदत्— "अयि सभ्याः कथं विस्मिता यूयम् । वयमरण्यचारिण-एवं विविधानि चिह्नानि पश्यन्तः शीघ्रमेव तं प्राणिनं-जानीमो, नात्र चित्रम् । गच्छता तेन प्राणिना एकतो यथा वनस्पतयश्चर्विताः न तथा पथःद्वितीयपार्श्वस्थाः । अनेनैव तस्य काणत्वं ज्ञातवानहम् । पत्राणि च मध्यत-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एव सच्छिद्राण्यतोऽधोदन्तराहित्य ज्ञातम् । मार्गस्योऽभयत्र मक्षिकाः पिपीलिकाश्चाचलन् । मक्षिका मधुप्रिया, पिपीलिकाश्चान्नप्रिया भवन्तीत्यतस्तृतीयचिह्नं ज्ञातवानस्मि ।"

तत्सर्वं श्रुत्वा पुनः पुनर्विविच्य च तमारण्यकं सत्यवादिनं "सूक्ष्मबुद्धिं" ज्ञात्वा बन्धनादमुञ्चन् राजपुरुषान् वणिग्भ्यां सहोष्ट्रान्वेषणाय आदिष्टवन्तश्चेति । तात्पर्य्यम्—

बुद्ध्या युक्तो जहातीह दुःखानि च बहून्यपि
प्राप्नोति च सुखानीह यथैवारण्यको जनः ॥

(क) १. गतउष्ट्रः कथमारण्यकेन ज्ञातः, कैश्चिह्नैस्तस्योष्ट्रस्य काणत्वं भाराक्रान्तत्वमधोदन्तराहित्यञ्च ज्ञातं तेन ?

२. वणिजौ कमपश्यतां ? तं किमपृच्छतां च ?

३. कथं चारण्यकेन ज्ञातं यदुष्ट्रस्यैकपार्श्वेऽन्नमन्यत्र मध्विति ?

४. आरण्यकं कथं न्यायाधिकारी बन्धनान्मुक्त्वा त्यक्तवान् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(ख) १. उभयत्र, शीघ्रम्, एकतः, अत्र—इन अव्यय शब्दों के अर्थ बता कर वाक्यों में इनका प्रयोग करो।

२. विहस्यावदत्, पिपीलिकाश्चान्नप्रिया, नैव दृष्ट उष्ट्र इति—इनमें सन्धिच्छेद करो।

(ग) इनका संस्कृत में अनुवाद करो:—

बाट की दोनों ओर मक्खियाँ और चिउँटियाँ थीं। इसमें क्या आश्चर्य है, हम बनवासी ऐसे ऐसे चिह्न देख कर जानते हैं कि यह कौन जन्तु है। एक तरफ़ की बनस्पति चरी हुई और दूसरी ओर की नहीं चबाई हुई थी॥

पाठः १२।

लम्बकर्णो वन्यशूकरश्च।

लम्बकर्ण (लंबे कान वाला, गधा) अन्त्राणि (अँतड़ियाँ) अरण्यानी (बड़ा जंगल) हास्यास्पद (हँसी की जगह) परिहास (ठट्ठा) मातुल (मामा)।

कस्याञ्चिदरण्यान्यामेकदा लम्बकर्णो वन्यशूकरश्च मिथोऽवसताम्। परिहासेन गर्दभ शिशुस्तमवदत्—मातुल! प्रणामस्ते, यस्त्वमतीव सुन्दरोऽसि। वन्यशूकरस्तस्यापूर्वं व्यवहारं दृष्ट्वातिविस्मितोऽभवत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रोधव्याकुलो भूत्वैवमैच्छद् यदेनं रासभं निहत्यास्य देहादन्त्राणि निष्कासयेयमिति । परं बहु विविच्य गर्दभमवदत्, रे लम्बकर्ण शिशोऽपसरास्माद् मम वनात् । स्वाभिलषितं स्थानं व्रज । त्वां निहत्याऽशनात् स्वदंष्ट्रा दूषयितुं नोत्सहे । नोचेदधुनैव निमेषार्द्धेन त्वामहं हन्याम् । रासभ आह भगवन् ! किं मयापराद्धम्, न जानामि, क्षमस्व । वन्यशूकर आह मूर्ख ! किमहं तव हास्यास्पदम्, यतो मां दृष्ट्वोपहससि, धिक्त्वां तव जनकञ्च । गच्छ द्रुततरं नो चेन्मया हन्तव्योऽसि ॥ तात्पर्य्यम्—

निर्विचारा ह्यनीतिज्ञाः स्वयं पण्डितमानिनः ।
आरभन्ते सतां हास्यं महतां ज्ञानशालिनाम् ॥

(क) १. रासभस्य शिशुना वन्यशूकरः कथमुपहसिता ?
२. उपहासस्य फलं किमभवत् ?
३. क्रुद्धो वन्यशूकरः किं कर्तुमैच्छत् किमुवाच च ?
४. अस्याः कथायास्तात्पर्य्यं लिख ।

(ख) ५. अवसताम्, उवाच, आह, हन्याम्—इन पदों के धातु बनाकर लट् उत्तम पुरुष के रूप लिखो ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२. किं मयापराद्धम् ? इस वाक्य का अर्थ करके अपनी संस्कृत में लिखो ।

३. क्रोधव्याकुलः निमेषार्द्धेन, स्वाभिलषितम् इनके अर्थ खोल कर लिखो ।

(ग) इनका संस्कृत में अनुवाद करो:--

नीति के न जानने वाले, अपने आप को पंडित मानने वाले, बिना विचारे अच्छे बड़े बड़े ज्ञानियों पर हँसना आरम्भ कर देते हैं। तुझे खाकर मैं अपना मुख अपवित्र करना नहीं चाहता। यहां से सरक जा। गधा बोला--महाराज! क्षमा कीजिये, मैं भूला ॥

पाठः १३

पतङ्ग उलूकश्च ।

कटोर (खोल)	अपेहि (हट जा)
व्याज (बहाना)	निष्कासन (निकालना)

कश्चिदुलूक एकस्य तरोः कोटरे स्वपिति स्म । तस्यैव शाखायामेकः पतङ्गोऽप्यवसत् सोऽगायत् । घूकः प्रथमं प्रार्थयते भोः पतङ्ग ! कृपयाऽपेह्यस्मात् स्थानात् । मम निद्राभङ्गं मा कुरु । पुनरपि पतङ्ग उच्चैर्गानमकरोत् । घूकेन मुहुरपि प्रार्थितं भोः ! तव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गानं मे न रोचते। दूरमपसर। पतङ्गस्तं प्रत्यवदत् यदि ते न रोचतेऽन्यत्र गच्छ, नाहं गीतं त्यजामि। किं स्वं मनो न विनोदयामि? उलूकस्तस्य निष्कासनेऽन्यमुपायमलभमानो व्याजेन तस्य स्तुतिमकरोदकथच्च—

मित्र! क्षमस्व मां, मया तेऽपराद्धम्। तव गीतं कोकिलागानसदृशम्। कदाचित् तव सुस्वरगीतं श्रुत्वा कोकिलोऽपि लज्जते। अधुना बहुगानेन तव कण्ठःशुष्यति सम्प्रत्यहं त्वाममृतसदृशं शीतलं मधुरञ्च पयो दर्शयामि। तज्जलं पीत्वा पुनर्गानमानन्देन करिष्यसि। तच्छ्रुत्वा पतङ्गो घूकमनुसृतवान्। आगच्छन्तमेव पतङ्गमुत्प्लुत्य पेचकोन्यगलत्। अतएवोच्यते 'रुचिर्भिन्ना हि लोकस्य एकमेव न रोचते। अपि वाञ्छत्यथैकोऽन्यदन्यदेवान्यपूरुषः॥
चाटूक्त्या प्रीयमाणो हि पुमाञ्छीघ्रं विनश्यति नहि चाटूक्तिकर्तारं प्रशंसन्ति महाजनाः॥'

(क) १. उलूकशब्दस्य पर्यायवाचकाः शब्दा येऽत्र पठितास्तान्वद।

२. पतङ्गस्य कथं मृत्युर्जात इति वद।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(ख) १. लज्जते, क्षमस्व, शुष्यति--ये प्रयोग किन किन धातुओं के किस किस पुरुष के किस किस वचन में हैं ?

२. पुनरपि, पतङ्गमुत्प्लुत्य, न्यगलत् , तज्जलम्—इन में संधि विच्छेद करो।

(ग) इनका संस्कृत में अनुवाद करो:—

कोयलें भी लज्जित होती हैं।

तुम बहुत देर से गा रहे हो, गला सूखता है, जल पी लो।

लोगों की रुचियां भिन्न भिन्न होती हैं।

कथा के द्वितीय श्लोक का गद्य बनाओ॥

पाठः १४

पुत्रयोः पितृस्नेहः

गिरि (पहाड़) उपत्यका (घाटी)

समन्ततः (चारों ओर) भस्मसात् (राख-सा)

एकस्य गिरेरुपत्यकायामेकं नगरमासीत्, लोकश्चानन्देन तत्र कालं क्षपयन्ति स्म। मनसाप्येवं कदापि न व्याचारयन् यदयं पर्वतएवास्मन्नाशनिमित्तं भविष्यति। एकदा प्रातरेवास्य पर्वतस्य शिखरमकस्मादस्फुटत्। तस्माद्धूमभस्माग्निशिखा धातुनिस-

Kirtikant Sharma Collection, Nagpur

CC-0. In Public Domain. Digitization by eGangotri

वाश्य निःसृत्य समन्ततोऽवहन् । आकाशश्चान्धकारेणाच्छन्नोऽभवत् । गिरिशिखरोत्थिताभिः पर्वतशिलाभिः तन्नगरमपि आसन्नदाहमासीत् । तद् दृष्ट्वा नगरवासिनोजनाः स्वस्य गृह-सामग्रीरुत्थाप्येतस्ततो यत्र कुत्रचिद् गन्तुमारभन्त ॥

तस्मिन् समये द्वौ सहोदरौ भ्रातरवपि तस्मिन्नतिशीघ्रतासमये गृहे प्रसुप्तौ वृद्धौ पितरौ विस्मृत्य धावन्तावस्मरतां यदहो ! आवयोर्जन्मप्रदावतिवृद्धौ दर्शनानन्ददौ पितरौ तत्रैव ज्वलद्गृहे प्रसुप्तौ । धिगावां यौ तौ परित्यज्यात्मनं रक्षितवन्ताविति विचार्य्य तावेव स्वसर्वस्वं मन्यमानौ पितरावानेतुं प्रस्थितौ । ज्वलद्गृहं प्रविश्य स्वात्मनोऽस्वास्थ्यञ्चाविचार्य्य पितरौ स्वस्वस्कन्धे धृत्वा किंचिद्दग्धकायौ निष्क्रान्तौ ॥

एवं तयोः पितृ स्नेहमतीव साहसं च दृष्ट्वा लोका विस्मितास्तावश्लाघन्त ॥

मातरं पितरंचैव साक्षात्प्रत्यक्षदेवताम् ।
मत्वा गृही निषेवेत सदा सर्वप्रयत्नतः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(क) १. पर्वतोपत्यकास्थं नगरं कथमनश्यत् ?

२. नगरस्य विनाशकाले नगरवासिभिः किं कृतम् ?

३. ज्वलद्गृहात् स्वपितौ कथं बहिरानयताम् पुत्रौ ?

४. पितरौ निष्कासयन्तौ सहोदरौ दृष्ट्वा लोकाः किमुक्तवन्तस्तौ ?

५. स गिरिर्नागराणां कथं विनाशनिमित्तमभवत्।

६. निर्गमनकाले द्वयो भ्रात्रोः का दशासीत् ?

(ख) १. अवसत्, क्षपयन्ति, अस्मरताम्—इन के धातु बताओ और लङ् लकार प्रथम पुरुष बहुवचन के रूप बताओ।

२. धिगावाम्, तत्रैव, अतीव, आकाशश्चान्धकारेणाच्छन्नोऽभवत्-इन पदों तथा वाक्य में सन्धियाँ तोड़ कर लिखो।

३. जन्मप्रदौ दर्शनानन्ददौ ज्वलद्गृहे—इनमें समास बता कर खोलो।

(ग) इनका संस्कृत में अनुवाद करो:—

माता पिता की सेवा देवता की भाँति करो।

माता पिता गृहस्थ के प्रत्यक्ष देवता हैं।

इन वाक्यों की हिन्दी बनाओ—

गिरेरुपत्यकायां बहूनि नगराण्यवसन्।

पित्रोर्निष्कासनकाले पुत्रयोः का दशासीत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाठः १५

साहसी बालः ।

अश्ववार (सवार) शतशः (सैकड़ों)
द्वादशवार्षिकः (बारह बरस का) सेतुतः (पुल से)
शाश्वत (नित्य)

कदाचिदेकस्मिन् नदीसनाथे नगरे द्वादशवार्षिको बालो नद्याः सेतोःसमीपेऽक्रीडद् अपश्यच्च यदेकस्मादश्वात् कश्चित् सायुधोऽश्ववारो नद्यां पतितः । स बालस्त्वरितमेव स्वक्रीडां त्यक्त्वाश्ववारस्य निष्कासनायाधावत् । तीरे स्थित्वा पश्यतां तमुद्धर्तुं यतमानानां शतशो जनानां समक्षमेव सवस्त्रो बालो नद्यां पतित्वा तमश्ववारं गृहीत्वा च तीरमनयत् ।

पुनरपि कतिपयमासानन्तरं तस्यामेव नद्यां काचिद् दशवार्षिकीकन्या सेतुतः पतिता प्रवाहेण प्रवाहिता । स एव कुमारः स्वभगिन्या मुखाच्छ्रुत्वा नदीं प्रत्यगच्छत् । अगाधे जले प्रवाह्यमाणा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुन्मज्ज्योन्मज्ज्य मज्जन्तीं तां कन्यां सहसोत्प्लुत्य कचे गृहीत्वा तज्जलं तीर्त्वा तीरमानयत् । बालकस्यैवं-विधं साहसं दृष्ट्वा जनास्तं प्रेम्णाऽचुम्बन् पारितोषि-कादिभिश्च प्रसन्नमकुर्वन् । बाला ! युष्माभिरपि तथा भवितव्यं यथायं साहसिको बाल आसीत् ।

अनित्यानि शरीराणि विभवा नैव शाश्वताः ।
परोपकरणं कायादसारात् सारमाहरेत ॥

(क) १. नद्यां कः कथं कस्मात् स्थानादपतत् ?
२. भगिन्यो मुखात्तेन किं श्रुतं ? तां कन्यां मज्जन्तीं कथं तीरमानीतवान ?

३. तस्य साहसं दृष्ट्वा तत्रस्थैर्जनैः किं कृतम् ? किञ्च दत्तं तस्मै ?

४. इन पदों को खोल कर लिखो--
सायुधोऽश्ववारः यतमानानाम्, शतशःजनानाम् ।

(ख) १. एकस्मात, यतमानानाम्, भगिन्यः, ये किस किस शब्द से किस किस विभक्ति के कौन कौन वचन हैं ? यह बता कर बहुवचन के रूप बोर्ड पर स्पष्ट लिख कर दिखाओ ।

२. सहसोत्प्लुत्य, जलमुत्तीर्य्य इन में सन्धिच्छेद करके उत्प्लुत्य, अवतीर्य्य इनके धातु प्रत्यय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बता कर जिस जिस अर्थ में प्रत्यय हैं, वे भी लिखो।

२. उन्मज्ज्योन्मज्ज्य मज्जन्तीं, इस वाक्य को खोल कर अर्थ करो।

(ख) इनका संस्कृत में अनुवाद करो:—

असार देह से परोपकार करना ही सार जान। दस दस बरस की तीन लड़कियां पुल पर से गिर पड़ीं।

वह झट दौड़ा, उस लड़की को पकड़ लिया और पानी में तैर कर उसे किनारे पर ले आया। वह लड़का बड़ा दलेर था, कपड़े पहिने नदी में कूद पड़ा।

पाठः १६

कुरीति सुरीतिश्च।

सुजीर्णम् (अच्छी तरह पचा हुआ)

कन्दुक (गेंद)	सुविचक्षण (चतुर)
विपणिः (दुकान, हाट)	सुशासिता (सधाई हुई)
विमनाः(उदास मन वाला)	

अत्र जगति कर्म्मणो द्वे रीति स्तः, सुरीतिः कुरीतिश्चेति। यः सर्वाणि कर्म्माणि सुरीत्या करोति,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स सर्वस्य प्रियो भवति। यश्च कुरीत्या करोति स लोकस्याप्रियो भवति। यथा पाठालये पाठावसरे स्वपाठस्थानि कानिचित्पदानि तव स्मृतौ नागच्छन्, तेषां तात्पर्य्यज्ञानाय त्वयाऽन्यः कश्चिच्छात्रः पृच्छ्यते। यदि स पृष्टः सन् कुपित इव यथा कथञ्चिदुक्त्वा गच्छेत्, तर्हि इयं तस्य कुरीतिर्लोकैर्निन्द्यते। अनया रीत्या लोका न तुष्यन्ति।

यदि स मधुरया वाचा वदति यद्दर्शय पुस्तकं कठिनानि पदानि चेति। अथ तत्सर्वं दृष्ट्वा विचार्य च तस्य समग्रस्य वाक्यस्यार्थं कथयति, तर्हि इयं तस्य सुरीतिर्जनैः श्लाघ्यते। अनया सुरीत्या सर्वे जनास्तस्य प्रियमाचरन्ति, तस्मिंश्च संतुष्टा भवन्ति।

अन्यच्च गतदिने कन्दुकक्रीडायै त्वं स्वं पितरं पृष्टवान्। पित्रा च त्वं सावधानतया विपण्यामेव स्थातुं कथितः। विमना इव विपण्यां स्थितवांश्चासावधानतया पुनरागतं पितरं दृष्ट्वाऽपृष्ट्वैव क्रीडितुं गतवानित्येषापि कर्मणः कुरीतिः। परं यदि पितुं साहाय्यमवश्यं करणीयमिति मत्वा प्रसन्नेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मनसा 'वाढम्' इत्युक्त्वा पितुराज्ञामङ्गीकृत्य सावधानतया विपण्यां स्थितवान् । अथ समागताय पित्र एवमवदः-"पितः ! पश्य विपण्यां सर्वाणि वस्तूनि यथावस्थितानि सन्ति न वेति ।" तदा तव पिता प्रेम्णा स्वहस्तं तव शिरसि निधाय धन्योसीत्युक्त्वा कन्दुकक्रीडायै स्वयमेव प्रेषयिष्यतीत्यपि कर्मणः सुरीतिः । अत एव सर्वैस्सुरीतिमवलम्ब्य कर्माणि कर्त्तव्यानीत्येवावगन्तव्यम् ।

तदुक्तम्—

सुजीर्णमन्नं सुविचक्षणः सुतः,
सुशासिता स्त्री नृपतिस्सुसेवितः,
सुचिन्त्य चोक्तं सुविचार्य्य यत्कृतं,
सुदीर्घकालेपि न याति विक्रियाम् ॥

(क) १. सुरीतेःकुरीतेश्च लक्षणमुदाहरणद्वारा स्पष्टं वद ॥

(ख) २. कर्म्मणः, स्मृतौ, विपण्याम्, विमनाः—
इन में कौन कौन सी विभक्तियां हैं ? इन की प्रथमा, द्वितीया के सारे रूप लिखो ।

३. अवदः, पश्य, प्रेषयिष्यति – ये क्या हैं ? इन धातुओं के लिट् के रूप बताओ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४. (क) 'तेषां तात्पर्य्यज्ञानाय त्वयान्यः कश्चिच्छात्रः पृच्छ्यते'।

(ख) 'इयमेव सुरीतिरिति नाम्ना कथ्यते'।

(ग) 'त्वं विपण्यां स्थातुं कथितः'।

(घ) 'त्वं स्वपितरमपृच्छः'।

(ङ) 'त्वं तं रूक्षवचनानि अवदः'।

(च) 'पिता स्वयमेव त्वां क्रीडायै प्रेषयिष्यति'।

इन में से पहिले तीन वाक्यों को कर्मवाच्य से कर्तृवाच्य और पिछले तीन वाक्यों को कर्तृवाच्य से कर्मवाच्य बनाकर लिखो।

(ग) इनका संस्कृत में अनुवाद करो:—

दूसरों के साथ अच्छी तरह बरतने को सुरीति कहते हैं।

कुरीति को कोई भी पसन्द नहीं करता।

बात सोच कर करनी चाहिये।

जब तक मैं न आऊँ, दुकान पर बैठे रहो।

फिर आकर तुम्हें गेंद खेलने की आज्ञा दूँगा।

—ooঃoঃoo—

पाठः १७

शिष्टाचारनियमाः।

बलीयान् (बहुत बली)	शपथकरण(कसम खानी)
अश्लील (गंदा)	व्यर्थ-द्रुति (बेढंगा चलना)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अतिवादः (बहुत बोलना) | त्वरितालापः (बहुत जल्द बोलना)

१. सदैव सत्यं वदेत् । सत्यमेव बलीयः। अनृतं सदा निष्फलमेव भवति । बालाः ! सन्दिग्धानि वचांसि न वदत ।

२. शपथकरणमश्लीलवचनं च नोचितम् । अनृत-वादिभिः सह संगतिमपि न कुरुत । पाठालये मार्गे च मन्दवचनानि कदापि न कथयत ।

३. असभ्या इव कर्माणि वचनानि च न व्यवहरत । गतौ व्यर्थ-द्रुतिः, यष्ट्या धरणीमाहत्य गमनम्, उच्चैरालापनमतिवाद स्त्वरितालापश्चातीव मन्दः स्वभावोऽस्ति ।

४. अतिथिभिरभ्यागतैरर्थिभिरध्यापकैर्भ्रातृभगि-नीभिरन्यैश्चापि जनैर्मधुरवाग्भिः सदैव व्यवहरत । "कृपया" इति वचनं यद्यप्यतीव लघु तथा प्यतिमधुरम् "कृतज्ञोऽस्मि" इति वाक्यमप्यतीव प्रियम् । तस्यापि व्यवहारस्थानानि ज्ञात्वा सर्वत्र व्यवहरत । यदा यूयं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कस्मिंश्चिन्मार्गेऽन्यस्मिन् स्थाने वा कंचिच्छिक्षक मन्यमुत्तमं जनं वा पश्यत तदा प्रणमत ।

५. दुर्बलैरसहायैर्वृद्धैरल्पवयस्कैः शिशुभिश्च सह कृपालुतया प्रेम्णा चाचरत ।

६. स्वकृत्यं मुहुर्मुहुः कथनमन्तरैव सुरीत्या यत्नेन च कुरुत ।

७. कस्यापि जनस्य मनसि दुःखं मा वहत । कृपालवो भद्रपुरुषाः स्वार्थं विहायापि परेषामानन्दाय कर्म्म कर्त्तुं यतन्ते ।

८. आत्मनः प्रतिकूलानि परेषां न समाचरेत ।
स्वात्मानुकूलकर्म्माणि कुर्यादेव परैस्सह ॥

(क) १. अस्य शिष्टाचारस्य यावन्तो,नियमास्त्वयापठितास्तत्र पञ्चमषष्ठसप्तमनियमानां प्रयोजनं वद ।

२. कृपालवः भद्रपुरुषाः परैः सह कथं व्यवहरन्ति ?

(ख) १. दुर्बलैः, असहायैः, अल्पवयस्कैः –एषां पदानामभिप्रायं वद ।

२. अभ्यागतैः, अर्थिभिः, वाग्भिः—इनके विभक्ति वचन बताकर कर्मविभक्ति में सब रूप लिखो ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. अन्यैश्च, कस्मिंश्चिन्मार्गे, तथाप्यतिमधुरम् इनमें सन्धिच्छेद करो।

४. आहत्य, मिलित्वा, आलपन्, विहाय—ये सब पद किन धातुओं से किस किस अर्थ में क्या क्या प्रत्यय लग कर बने हैं ?

(ग) इनका संस्कृत में अनुवाद करो—

जो अपने प्रतिकूल है, वह दूसरे को कभी अनुकूल नहीं।

जो अपने अनुकूल है, वह सब के अनुकूल है।

भले मनुष्य निज निज काम को बार बार मुँह से कहे बिना करने को चेष्टा करते हैं।

किसी का भी मन मत दुखाओ॥

पाठः १८

दाक्षिणात्यपाश्चात्यौ।

कृषीवलः (किसान)

क्षुत्तृट्पीडित (भूखा प्यासा)

दाक्षिणात्यः (दक्खन का)

पाश्चात्यः (पच्छम का)

बद्धपरिकरः (कमर बाँधे हुए)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भर्त्सय (झिड़क)   कौन्तेय (कुन्तीपुत्र, अर्जुन)

एकस्यां रात्रौ कश्चित् कृषीवलो दाक्षिणात्यः स्वद्वारि स्थितवान् । केनचित् क्षुत्-तृट् पीडितेन श्रान्तेन पाश्चात्येन किञ्चिद् भोजनं याचितः। स तं परुषया वाचाऽवदत्, नास्ति तवार्थे मम पार्श्वे किंचिदन्नादि । पाश्चात्योऽवदत्, किञ्चिज्जलमेव देहीति। तेन तदापि नाङ्गीकृतम् । एवं श्रुत्वा पाश्चात्यस्तन्मुखं पश्यन् तस्य गृहान्निस्सृतवान् ।

एकदा स एव दाक्षिणात्यः मृगयामनुसरन्नरण्ये पन्थानं नालभत । विरमितस्ततो भ्राम्यंस्तस्यैव पाश्चात्यस्य कुटीरं गतवान्, तमेव स्वप्राप्यस्थानं चापृच्छत् । तेन पाश्चात्येनोक्तम् तवप्राप्यस्थानं दूरे, रविरस्तोन्मुखोऽस्त्यतः स्वस्थानं त्वं न प्राप्स्यसीति। यद्यरण्ये वसिष्यसि तदा व्याघ्रास्त्वां भक्षयिष्यन्तीत्यतोऽत्रैव मम कुटीरे रात्रौ निवस, भक्ष्यं पेयमास्तरणञ्च मत्तो गृहाण। तच्छ्रुत्वातिप्रसन्नः कर्षकस्तत्रैवावसत् । प्रातस्तेन पाश्चात्येनोक्तं भ्रातर्यद्यपि तव प्राप्यस्थानमितःक्रोशद्वयं तथाप्ययमेव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सरलःपन्था अस्ति, गच्छ । स्वयं च वद्धपरिकरस्तस्य पुरोऽचलत् ।

प्रत्यागमनसमये पाश्चात्येन स कर्षक उक्तः 'किन्त्वं मां जानासि'। काषकोतीवलज्जितस्तं प्रत्यवदत् 'जानामीति'। पाश्चात्योऽवदत् 'स्वकीये द्वार एवान्यत्र वा ?' अतीवलज्जितं तं पाश्चात्यः पुनरकथयत्— "सम्प्रति अहमेकां शिक्षां दत्वा गच्छामि । यदि कश्चित् क्षुत्तृट्परीतःश्रान्तस्तव द्वार आगच्छेत् तं मम पार्श्वे किञ्चिन्नास्तीत्युक्त्वा मा भर्त्सयति ॥ तदुक्तम्—

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्यथितस्यौषधं पथ्यं नीरुजस्य किमौषधैः" ॥

(क) १. भोजनं जलञ्च याचमानेन पाश्चात्येन सह दाक्षिणात्यः कर्षकः कथं व्यवहरति स्म ?

२. तस्य रूक्षं वचनं श्रुत्वा पाश्चात्येन किं कृतम् ? एकदा स एव कर्षकः कथं किमर्थञ्च तमेव पाश्चात्यमुपागतः ?

३. पाश्चात्यस्तेन सह कथं व्यवहृतवान्, तं प्रति किमुक्तवांश्च ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४. प्रभातकाले पन्थानं दर्शयित्वा पाश्चात्येन किमुक्तम्, दाक्षिणात्येन च किमुत्तरं दत्तम् ?
५. पुनश्च पाश्चात्येन किमुपदिष्टः स दाक्षिणात्यः ?
६. इदानीं वद स पाश्चात्यः कीदृशः पुरुषोऽभूत ?

(ख) १. पथि, पथ्यम्—इनके अर्थ बताओ।
२. क्षुत्तृट्पीडितः, अतीवलज्जितः, क्षुत्तृट्परीतः,
इन समस्त पदों को खोलकर इनके अर्थ करोः—

(ग) इनका संस्कृत में अनुवाद करोः—
भूखे को अन्न और प्यासे को पानी दो।
एक अमीर किसान रात को जङ्गल में रास्ता भूल गया और एक दीन बनवासी के यहां आ कर ठहरा। बनवासी ने यथाशक्ति उसे खाना खिलाया और रहने को जगह दो।

दूसरे दिन प्रातःकाल उठकर बनवासी ने उस किसान को उसके घर का रास्ता दिखाया।
जहाँ तक होसके दूसरों को सहायता करो।

पाठः १६

उदारमतिर्धार्मिकः।

उदारमति (उदारचित्तवाला) प्रफुल्लितचित्तः (प्रसन्न) आर्ता दशा (दुःख की हालत) कर्मतः निवृत्तः (काम)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

से हटा हुआ अर्थात् जो काम कर चुका है, चोलकोष (जेब, पाकट) गुल्मान्तरितौ (झाड़ियों में छिपे हुए) अद्रोह (बुराई न करनी) आमोदार्थं (दिल्लगी के लिये)

कस्मिंश्चिद् विद्यालये एक उपाध्यायश्छात्रेषु तथा प्रीतिमानासीद् यथा ते तस्य मित्राणि । एकस्मिन्नहनि कश्चिच्छात्र आचार्य्येण सहाटन् कस्यचित् क्षेत्रस्य समीप एकस्यातीव निर्धनस्य कर्षकस्योद्धृते उपानहावपश्यत् । उपाध्यायमुवाच च—श्रीमान्! ममायं विचारो यदिमे उपानहौ कुत्रचिद् निगोप्य कर्मतो निवृत्तस्य कर्षकस्य चेष्टां गुल्मान्तरितौ भूत्वा पश्यावः, यत्कथं स व्याकुलीभूयात्मानं चिन्तासागरे निपातयिष्यतीति । तच्छ्रुत्वाचार्य्येणोक्तम्—छात्र ! मैवं कर्त्तव्यम् यद्यामोदार्थमेवं करणे तवेच्छा तदान्यया रीत्यास्य दरिद्रस्यामोदो द्रष्टव्यः । यदनयोरुपानहोर्मध्ये किञ्चिद् द्रव्यं निक्षिप्यावामात्मानं गुल्मांतरितं कुर्वः, पुनः समागतस्य कर्मकर्तुरामोदं पश्याव इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तच्छ्रुत्वा छात्रेणाचार्य्यशिक्षां स्वीकृत्य तथैव कृतम् । उपानहोर्मध्ये स्वर्णमुद्रां निक्षिप्य तौ गुरुमंतरितौ जातौ । यदा सोऽतिदरिद्रः कर्मकरः कर्मतो निवृत्य वस्त्राणि परिधायोपानहौ धर्तुमुद्यतोऽस्यामुपानहि पादसंलग्नं किञ्चिद् वस्त्वनुभूय तन्निरीक्ष्य चेतस्ततः पश्यंश्चकितो यदा कमपि जनं नापश्यत्, तदा तां स्वर्णमुद्रां चोलकोषे निधायातिप्रसन्नो भूत्वाऽऽनन्दाश्रूणि वहन् जगदीश्वरप्रसादं मन्यमानः प्रफुल्लचित्तो धननिक्षेप्त्र एवमशिषं दत्तवान्—करुणामय ! मम भार्य्याया आर्तां दशां दृष्ट्वा सन्ततेश्च भोजनाच्छादनादि कष्टमवेत्त्य तवकृतस्यानुग्रहस्याहं कृतज्ञतां मन्यमानस्त्वत्तः प्रार्थये यदसौ स्वर्णप्रक्षेप्ता नीरोगः चिरायुर्भूत्वैवमेव सदा कुर्य्यादिति ! तात्पर्य्यम्—

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानञ्च सतां धर्म्मः सनातनः ।

(क) १. तस्मिन् विद्यालये कीदृगुपाध्यायोऽभूत ?

२. उपाध्यायेन सह छात्रेण मार्गेऽटता किं दृष्टम् ?

३. छात्रेण किमुपन्यस्तमुपाध्यायेन च किं सूचितम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४. अन्ततः किं कृतम् ?

५. कर्म्मकरः उपानहि मुद्रां दृष्ट्वा किमकरोत ?

६. कर्मकरस्याशिषं वद ।

अस्याः कथायास्तात्पर्य्यं किम् ?

(ख) १. गिर्, अशिष् और उपानह्-शब्दों के सम्पूर्ण विभक्तियों के रूप सुनाओ ।

२. पिछले श्लोक का अर्थ बताओ और उसे कण्ठ करो ।

इनका खोल कर अर्थ करो—निर्धनः, कर्मकरः, आनन्दाश्रूणि, प्रफूल्लचित्तः ।

(ग) इनका संस्कृत में अनुवाद करो:—

दीनों पर दया करो और यथाशक्ति उनको कुछ दो । उस अमीर के लड़के ने अपने गुरु के कहने से एक मजदूर की दोनों जूतियों में एक एक रुपया डाल दिया । जब मजदूर बाहर आया तो अपनी जूती में रुपया देख कर बहुत हैरान हुआ । फिर उसने ईश्वर का धन्यवाद किया और प्रार्थना की कि जिसने मुझे ये रुपये दिये हैं, ईश्वर उसका भला करे !

मेरे बाल-बच्चे भूखे हैं, मैं उनके लिये इन रुपयों का अन्न ले जाऊँगा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाठः २०

द्वावर्थशुची ।

अर्जयित्वा (इकट्ठा करके)	विवदमानौ (झगड़ते हुए)
निहित (गड़ा हुआ)	निर्णेतुम् (निर्णय करने को)
धनाढ्य (धनी)	सन्तति (सन्तान)
अर्थशुचित्व (दियानतदारी)	सुकर (सहज, सुगम)
यौतुकरूपेण (दहेज़ के तौर पर)	

कश्चित् पुरुषः कतिचिद् वर्षाणि बहुधनमर्जयित्वा कञ्चित् भूमिभागं क्रीतवान् । अचिराद् भूमौ कृष्टायां सत्यामेकस्मिन् स्थाने सुगुप्तं निहितं स्वर्णसमूहं रत्नानि च लब्धवान् । यदा तेनेदं लब्धं, तदा कोऽपि तत्र नासीत् । अतो यदि स इच्छेत् तद् सर्वमेव धनं गृहीत्वा अतीव धनाढ्यो भवेत् । परं स तन्नैच्छद् अर्थशुचित्वमेवावाञ्छत् ।

अचिन्तयच्च मया धनेन केवलमिदं क्षेत्रं क्रीतं न तन्निहितानि वस्तूनि । अतस्तत् सकलं द्रव्यमेकत्रं कृत्वा नीत्वा च भूमिविक्रेतारमुपा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गच्छदवदच्च "महाशय ! पश्येदं समस्तं स्वर्णमेतानि च रत्नानि क्रीतभूमेर्मया लब्धानि तदिदं सर्वं द्रव्यं युष्माकमेव, तद् गृह्यताम् । तेनोक्तमिदं मे कदापि नास्ति, तद् भवतएवास्ति । मया सामग्री-सहितं सर्वं क्षेत्रं तुभ्यं दत्तम् । नाहं तत्स्वाम्यतोऽहं तानि धनानि ग्रहीतुमसमर्थः ।

चिरकालमेवं तौ परस्परं विवदमानौ स्व स्वधर्मे दृढावास्ताम् । तयोर्मध्ये नैकोऽपि तद्धनं गृहीतवान्, यतस्तौ तन्नैवात्मनोवगच्छतः । सर्वे पुरुषा इदं श्रुत्वा तौ स्तुतवन्तः । परं कश्चिदपि पुरुषोऽनयोर्मध्ये क इदं धनं ग्रहीतुमर्हः इति निश्चेतुं न शक्तः ।

अन्ते तयोर्मध्ये कस्मै तद्धनं दातव्यमिति लोकैः राजा पृष्टः । राज्ञोक्तमहमिदं निर्णेतुमशक्तोऽस्मि । परं तौ भद्रपुरुषौ नात्र सन्देहः । अतस्तयो राज्ञा सन्ततिः पृष्टा । लोकैरुक्तमेकः पुत्रवानस्ति द्वितीय-स्यैका विवाहार्हा पुत्री वर्तते । राज्ञा हर्षेणोक्तमिदानीं न्यायः सुकरः । अनयोर्विवाहः कार्य्यः स्वर्णरत्नानि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

च ताभ्यां यौतुकरूपेण देयानि । अयमेव सर्वोत्तम उपायः सर्वैः स्वीकृतः । तस्मिन्नेव वर्षे क्षेत्रे महत् शस्यं जातं बह्वन्नं चोत्पन्नम् ॥ तदुक्तम् ॥

शुचित्वं त्यागिता शौर्य्यं सामान्यं सुखदुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्‌गुणाः ॥

(क) १. अस्यां कथायां क्षेत्रस्य क्रेता विक्रेता च द्वावेवार्थशुची इति स्पष्टं वर्णय ।

२. लोकैः राज्ञा च तयोरर्थशुचित्वं प्रति किमुक्तम् ?

३. राज्ञा कथं तयोर्न्यायः कृतः ?

(ख) निम्नलिखित वाक्यों में से कर्मवाच्य को कर्तृवाच्य और कर्तृवाच्य को कर्म्मवाच्य में लिखो ।

(१) कश्चित् पुरुषः कञ्चिद् भूमिभागं क्रीतवान् ।

(२) एकस्मिन् स्थाने निहितं स्वर्णं रत्नानि च स लेभे ।

(३) तेनेदं प्राप्तम् ।

(४) मया बहुधनेन केवलं क्षेत्रं क्रीतम् ।

(ग) निहितं, विवदमानौ, निर्णेतुम्—इनमें कौन कौन धातु और उपसर्ग हैं ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(घ) 'राज्ञा हर्षेणोक्तम्' इस वाक्य में राज्ञा और हर्षेण दोनों तृतीया हैं, इनका पृथक् पृथक् काम बताओ।

(ङ) इनका संस्कृत में अनुवाद करोः—

अर्थशुचित्व बड़ी अच्छी चीज़ है।

एक आदमी ने कुछ भूमि मोल ली और उसे उसके एक कोने में बहुत सा धन गड़ा हुआ मिला। उसने उस धन को आप न लिया और वह उसे भूमि बेचने वाले के पास ले गया।

इसने भी यह धन न लिया।

अन्त में यह बात ठहरी कि एक के पुत्र का दूसरे की पुत्री के साथ विवाह कर दिया जाए और वह धन उन दोनों को दिया जाय॥

—००:०:००—

पाठः २१

टिट्टिभीशावकाः।

कर्तनयोग्य (काटने के योग्य) वचनबन्धु (नाम का मित्र) टिट्टिभी (टिटिहरी) लवित्र (दरांती, खुरपा) शावक (बच्चा) तेजित (तेज़ किया हुआ) लवन (काटना) समास (संक्षेप) आत्मसंयत्त (अपने आधीन)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एकस्मिन् क्षेत्र एका टिट्टिभी वसतिस्म। यदा तत् क्षेत्रं पक्कं कर्तनयोग्यं च जातं, तदा टिट्टिभ्यचिन्तयत् मम शावकानामद्यपर्य्यन्तं पक्षा न प्रस्फुटिताः। यद्यस्य क्षेत्रस्य स्वामी क्षेत्रलवनं करिष्यति, का गतिस्तेषां भविष्यतीति। ततः प्रभृति यदा सा शावकानां पालनाय कणविलोकनार्थं बहिर्याति शावकानित्यादिशति, शिशवोऽस्मिन् क्षेत्रे मम परोक्षे यद् यत् कोऽपि वदेत् तत्सर्वं गृहागतायै मह्यं कथनीयम्।

एकदा सपुत्रः क्षेत्रपतिस्तत् क्षेत्रमागत्य दृष्ट्वा कथितवान् पुत्र! अस्यातिपक्कस्य क्षेत्रस्य लवनार्थमद्यैव सहवासिन आनेतव्याः, यतस्ते लवने सहायका भविष्यन्ति इति। शावकास्तत्सर्वं वृत्तं मात्रे न्यवेदयन्, कथितवन्तश्च, मातर्नयास्मानन्यं प्रदेशम्। मातोक्तवती, यद्येवं वचनबन्धुषु विश्वसिति स्वामी, तदा निश्चिन्ता अत्रैव वसथ, नायं निर्गमनसमयः। पुनरपि परोक्षवार्तां मह्यमावेदयत। यदाहं ज्ञास्यामि क्षेत्रलवनमद्य भविष्यतीति, तदायुष्मानन्यत्र नेष्यामीति। पुनर्यदा क्षेत्रस्वामी तत्र गत्वा पुत्रमाह, याहि बन्धून् कथय श्वःप्रभाते क्षेत्र-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्तने सहाया भवितुमर्हथेति । तच्छ्रुत्वा शावका अतीव भीता आगतायै मात्रे न्यवेदयंश्च । मातोक्तवती—अर्भकाः ! बन्धुवर्गो बन्धुकार्यं करिष्यतीति मिथ्यैव । परदिने स्वामी बन्धुवर्गं चिरं प्रतिपालितवान्, स च नागच्छत् । पुनः क्षेत्रस्वामी पुत्रमुक्तवान् प्रातर्द्वे लवित्रे तेजिते कार्य्ये, आवामेव शस्यं लुनीवः । शावका इत्यपि सर्वं यदा मात्रे न्यवेदयंस्तदा तेषां जननी पुत्रानाह । पुत्राः ! अधुनात्र वासो न विधेयः । यतो यः स्वयं किमपि कार्य्यं कर्तुमङ्गीकरोति स प्रायस्तस्यान्तं यातीति । ततः सा शावकानन्यत्र नीतवती । स्वाम्यपि सपुत्रः क्षेत्रलवनं कृतवान् ॥ तात्पर्यम्—

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतत् विद्यात् समासेन लक्षणं सुखदुःखयोः ॥
विश्वासो नैव कर्त्तव्यः सुहृदिष्टजनादिषु ।
यत् कर्म्म चात्मसंयच्चं तदात्मन्येव धारयेत् ॥

(क) १. टिट्टिभ्या निजनीडः कुत्र निर्मितः ?

२. पक्वं क्षेत्रं दृष्ट्वा टिट्टिभी किमचिन्तयत्, बहिर्गमनसमये शावकान् किमकथयच्च ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. प्रथमं शावकैः किं कथिता टिट्टिभी, तथा च किं कथितं तदुत्तरे ?

४. पुनश्च शावकैः किमुक्ता माता, तदुत्तरमपि कथयत ।

५. तदनन्तरम् शावकैः किमुक्तम् ? मात्रा च किं कृतम् ?

६. यत् टिट्टिभ्या उक्तमनुमितं वा किं तदेव जातम् ? अस्य कारणं वद ।

७. अस्याः कथाया तात्पर्य्यं वद ।

(ख) १. विलोकनार्थं, लवनार्थम्—इनके लिये एक एक शब्द लिखो ।

२. सहवासिनः, निर्गमनसमयः, गृहागतायै, सुहृदिष्ट-जनादिषु—इनके अर्थ खोल कर लिखो ।

३. 'लवन' का अर्थ बताओ । यह किस धातु से बना है ? 'लवन' और 'लवण' के अर्थों में क्या भेद है ?

४. यदा, अद्यपर्य्यन्तम्, यदि, ततः प्रभृति, बहिः, एकदा, यतः, इति, पुनरपि, न, श्वः, एव चिरम् च, स्वयम्, ततः, अन्यत्र—इनके अर्थ बताओ और इनका छोटे छोटे वाक्यों में प्रयोग करो ।

(ग) इनका संस्कृत में अनुवाद करो—

अपनी सहायता आप करो, और दूसरे के भरोसे न रहो । जब एक किसान का खेत पक कर तैयार हुआ, तो उसने पहिले अपने पड़ोसियों से सहायता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

माँगी । जब पड़ोसी न आए तो अपने भाई-बन्दों से सहायता चाही ।

जब भाई बन्धु भी उसकी सहायता को न आए, तो आप अकेला खेत काटने लगा और झट पट सारा खेत काट लिया ।

सच कहा है "आप काम महा काम"

पाठः २२

सामान्य नीतिः ।

प्रथमो भागः

पराभव (तिरस्कार, निरादर) क्षय (नाश)

मिथ्योपेत (बुरा, अनुचित)

शुभं वा यदि वा पापं द्वेषं वा यदि वा प्रियम् ।
अपृष्टस्तस्य तद्ब्रूयाद् यस्य नेच्छेत् पराभवम् ॥१॥
मिथ्योपेतानि कर्माणि सिद्धिमन्त्यपि वर्जयेत्
सदुपायानि कर्म्माणि कुर्वीतासिद्धिमन्त्यपि ॥२॥
किन्नु मे स्यादिदं कृत्वा किन्नु मे स्यादकुर्वतः
इति कर्म्माणि सञ्चिन्त्य कुर्य्याद् वा पुरुषो न वा ॥३॥
न वृद्धिर्बहुः मन्तव्या या वृद्धिः क्षयमावहेत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षयोऽपि बहुमन्तव्यो यःक्षयो वृद्धिमावहेत् ॥४॥

भावार्थः—अन्यपुरुषस्य कल्याणाय शुभमशुभं वा सर्वं सूचनीयम् । सिद्धेरभावेऽपि ऋज्वेव कर्म्म सर्वदा करणीयम् । सम्यग्विचार्य्य हितमुचितं फलप्रदं च कर्म्म कर्त्तव्यम् ।

(क) १. ऊपर लिखे वाक्यों को कापियों पर लिखो और हिन्दी में अर्थ करो ।

२. पराभव के अर्थ बताओ, भव के पहले उद्, प्र, वि लगाने से क्या क्या अर्थ हो जाते हैं ?

३. वृद्धि, क्षय, मन्तव्य, इनमें धातु बताओ ।

(ग) इनका संस्कृत में अनुवाद करो—

जिसका तुम भला चाहते हो, उसे बिना पूछे भी सब ऊँच नीच जता दो ।

सदा उचित काम करो ।

इस काम के करने से मेरा लाभ होगा या हानि ?

वह काम करना चाहिये, जिससे वृद्धि हो ॥

द्वितीयो भागः ।

तिर्य्यंश्च (पशु पक्षी) आवसथ (स्थान, घर)
सोदर (सगाभाई) क्षयिणी (घटती हुई)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गाढ़ं गुणवती विद्या न मुदे विनयं विना ।
महत्सु विनयोपेता मूर्खतापि मुदे भवेत् ॥५॥
यान्ति न्यायप्रवृत्तस्य तिर्य्यञ्चोपि सहायताम् ।
अपन्थानन्तु गच्छन्तं सोदरोपि विमुञ्चति ॥६॥
रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोस्य विश्रामः ॥७॥

आरम्भगुर्वी क्षयिणी क्रमेण,
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना,
छायेव मैत्री खलसज्जनानाम् ॥८॥

भावार्थः—विनयोपेतैव विद्या हर्षाय जायते । न्यायपथवर्तिनः पुरुषस्य सर्वे सहाया भवन्ति। धैर्य्यनम्रतादिगुणोपेत एव पुरुषः साधुर्भवति । पराधीनस्य पुरुषस्य मरणमेव वरम् । खलस्य मैत्री प्रतिदिनं हीयते, सज्जनस्य तु वर्धत एव ।

(क) १. ऊपर लिखे वाक्यों को कापियों पर लिखो ।
२. 'विना' के योग में क्या विभक्ति आती है ? उदाहरण दो ।
३. तिर्य्यञ्च शब्द की सारी विभक्तियों के रूप लिखो ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४. चिरप्रवासी, परान्नभोजी, परावसथशायी—इन में समासविच्छेद करो—

(ख) इनका संस्कृत में अनुवाद करो—
विद्या के साथ विनय का होना आवश्यक है।
कुमार्गी को उसके बन्धु भी त्याग देते हैं।
पराधीन सुपने सुख नाहीं।
सज्जनों की मित्रता दिन पर दिन बढ़ती जाती है॥

पाठः २३।

निःस्वार्थञ्च कर्म फलप्रदम्।

रोपयत् (लगाता हुआ) निशम्य (सुनकर)
व्ययितो भवति } (ख़र्च होता है) वप् (बोना)
वार्द्धक्य (बुढ़ापा) कोविद (चतुर)

कदाचिदिनारण्यप्रदेशस्यैकः सम्राड् मृगयां गच्छन् कञ्चिद् वृद्धं स्वोद्याने वृक्षान् रोपयन्तमपश्यत्, तस्यायुश्च पृष्टवान्। वृद्धस्तं प्रत्यवदत् श्रीमन्! चतुर्हायणोऽहम्। सम्राडवदत् "कथमेवं ममापि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुरतोसत्यं वदासि"। स आह, "भूपते ! नैतदसत्यम्, सत्यमेव वदामि, व्यर्थकर्म्मस्वसद्व्यवहारेषु च गतं समयं बुद्धिमन्तो जनाः स्वायुषि न गणयन्ति। तमेव कालं गणयन्ति, य ईश्वरस्य स्मरणे स्वदेशस्योपकार-कर्म्मणि, तत्सेवायाश्च व्ययितो भवति।

सम्राट् पुनरपृच्छत् "कथमेवंविधं परिश्रमं वार्द्धक्ये करोषि ? यत इमे वृक्षाः स्वायुषि कदापि तुभ्यं फलानि न दास्यन्ति"। इति श्रुत्वा वृद्धः पुनरपि तं प्रत्यवदत् "सत्यमेवैतद् यदत्रभवन्तो वदन्ति, परमिदमहं सत्यं जानामि यदन्यैरारोपितानां वृक्षाणां फलानि वयं भक्षयामोऽस्मदारोपितानां फलवतां तरूणां फलान्यन्ये भक्षयिष्यन्ति।"

तस्य वृद्धस्यैवंविधानि मृदूनि तथ्यानि च वचांसि श्रुत्वातिप्रसन्नः सम्राट् तस्मै बहुधनं पुरस्कारत्वेन दत्त्वाकथयत् "वृद्ध ! पुनरपि कदाचिन्मह्यं दर्शनं दातव्यम्"। तच्छ्रुत्वा पुरस्कारमानन्देन गृहीत्वा, तदुत्तमंवचनञ्च निशम्य वृद्धः पुनरपीदमुक्तवान् "प्रभो ! धन्योऽहं यस्येदृशं शीघ्रमेव फलप्रदं कर्म ! अन्यैरारो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पितास्तरवो बहुकालेन फलवन्तो भवन्ति। मम तु सद्य एव फलप्रदाः सञ्जाताः। एवं श्रुत्वा स भूपतिः पुनस्तं कथितवान् "नैतच्चित्रं निःस्वार्थपरोपकारकर्मणां वीजानि ये श्रद्धया वपन्ति, तेऽवश्यमेव त्वरितं तेषां फलानि भुञ्जत एव"।

निःस्वार्थपरोपकारकर्मकर्तारोऽवश्यमेव लोकप्रिया भूत्वेश्वरस्याप्यत्यन्तप्रिया भवन्ति ॥

तदुक्तम्—

यस्य चात्मार्थमेवार्थः स च नार्थस्य कोविदः।

(क) १. इनारण्यसम्राजा वृद्धः किं पृष्टः?

२. वृद्धस्योत्तरं श्रुत्वा पुनः किं भणितं सम्राजा?

३. वृद्धेन किं भणितम्?

४. पुनश्च वृद्धः किं पृष्टः? तेन किमुक्तंच?

५. सम्राजा तदा किं कृतम्?

६. वृद्धेन किं कथितम्?

(ख) १. निशम्य, आरोपितः, सञ्जाताः ये क्या हैं?

२. चतुर्हायणाः, उपकारकर्मणि, परोपकारकर्त्तारः, लोकप्रियाः--इनमें समासविच्छेद करो।

३. सम्राट् वृद्धमपश्यत्—इसे कर्मवाच्य में लिख कर दिखाओ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(ग) इनका संस्कृत में अनुवाद करो:—

क्या तुम हमारे सामने भी झूठ बोलते हो !

जो समय ईश्वर के स्मरण में और देशोपकार में लगता है, बुद्धिमान् उसको ही अपनी आयु में गिनते हैं ॥

"हमारे लगाए हुए वृक्षों के फल और लोग खाएँगे" बादशाह यह सुन कर बड़ा प्रसन्न हुआ और बुड्ढे को सौ रुपया इनाम दिया ॥

पाठः २४

सुपरीक्षकः ।

विज्ञापन पत्र (इश्तिहार) प्रशस्तिपत्र (सिफ़ारशी चिट्ठी) दारुपीठ (मेज़) पिहित (बंद) संघट्ट (भीड़भाड़) उद्‌घाटन (खोलना) ।

एकदा कश्चित् कार्य्याध्यक्षो भद्रपुरुषः स्वस्य साहाय्यार्थमन्यं कञ्चित् सुलेखं सहायमन्विच्छन् विज्ञापनपत्राणि व्यतरत् । तत्पश्चात् प्रशस्तिपत्रैः सहितानि पञ्चाशत् निवेदनपत्राणि स प्राप्तवान् ।

एकोऽतिनिपुणो बालको निजनिवेदनपत्रं स्वय-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मादाय तद् गृहं गत्वा तस्मै कार्य्यालयाध्यक्षायायच्छद् अनमच्च । यदैकस्मिन्नहनि स भद्रपुरुषस्तानि समागतपत्राणि निरीक्ष्य परीक्षितुमारब्धवान् तदा सर्वाणि प्रशस्तिपत्रैः सहितानि निवेदनपत्राणि दृष्ट्वाधरीकृत्य च तस्यैव बालकस्यावेदनपत्रमचिनोत्। तत्समये पार्श्वस्थः कश्चित् तस्य सुहृत्साश्चर्यमवदत् "कथमयं महानन्यायो यदन्यान्युत्तमानि प्रशस्तिपत्रसहितानि निवेदनपत्राण्यपहाय भवानेकस्य बालकस्य निवेदनपत्रं चिनोतीति ? स मित्रं प्रत्यकथयत्— यदयं मित्र ! ते भ्रमोऽस्ति, नात्र ममान्यायः । अहमस्य निवेदनपत्रेण सह बहूनि प्रशस्ति पत्राणि अपश्यम् ।

तच्छृणु—ममान्तरागमनात् पूर्वमयं स्वपादत्राणं मृष्टवान्, तच्च गृहाद् बहिरेवात्यजत्, मया पिहितस्य द्वारस्योद्घाटनेऽतिनैपुण्यमदर्शयत् । मम प्रश्नानामुत्तरदाने स आत्मनोतिदैन्यं नम्रताञ्चादर्शयत् । यदा स बहिरासीदहमपश्यं यदेकस्मै तत्कालमागताय वृद्धायपङ्गवे स्वकीयमासनं प्रायच्छत्, तेन च स्वकारुण्यगुणस्य परिचयमयच्छत् । पुनश्च यत् पुस्तकमहं तस्य परीक्षार्थं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दारुपीठाद् भूमौ प्राक्षिपं तदादरेण उपादाय तस्मिन्नेव दारुपीठेऽस्थापयत् । एकस्मिन् जनसमूहे परस्पर संघट्टभयेन तत्पश्चादेवातिष्ठत्, तेनात्मानं धैर्यवन्तं विनयवन्तं चादर्शयत् । पुनरस्य वस्त्राण्यतीव रुचिराणि, केशाः संस्कृताः दन्ताश्च श्वेताः, हस्ताक्षरकरणसमयेऽहमपश्यं यत्तस्याङ्गुलिनखा अपि शुद्धा निर्मलाश्च । नैतानि प्रशस्तिपत्राणीव ? किं भवानन्यत् प्रशस्तिपत्रं वाञ्छति ? मित्र ! यो मे एकवारमपि कियत्क्षणं दृष्टिपथमागच्छेत्, तमहं पत्रदर्शकापेक्षयाधिकतरं मन्ये ॥

तदुक्तम्—

आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः ॥

(क) १. कार्य्याध्यक्षेण किमभिहितम् ?

२. कियन्ति निवेदनपत्राणि समागतानि ।

३. सुहृदा किं भणितम् ?

४. बालकस्य प्रशस्तिचिह्नान्येकैकशो वद ।

५. कार्य्याध्यक्षेण स्वमित्रं प्रति किं कथितम् ?

(ख) १. अत्यजत्, अदर्शयत् ये क्या हैं ? इनके धातुओं के विधिलिङ् के रूप लिखो ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२. 'परस्परसंघट्टभयेन' 'हस्ताक्षरकरणसमये' इन में समासविच्छेद करो।

३. पिछले श्लोक का अर्थ करो। कर्म्मवाच्य को कर्तृवाच्य में बदल कर लिखो।

(ग) इनका संस्कृत में अनुवाद करो:—

उसके पास पचास अर्ज़ियां सिफ़ारिश समेत आईं। इनमें से उसने एक लड़के की अर्ज़ी चुन ली। यह लड़का जूता साफ़ करके अन्दर आया। उसने अपना आसन छोड़ दिया और एक बूढ़े को दे दिया। बोलने से और चाल-ढाल से अन्दर का हाल जान पड़ता है॥

पाठः २५

चतुरः श्वाः।

श्रेष्ठिन् (मुखिया)	पाचक (रसोइया)
अवशिष्ट (बचा हुआ)	उच्छिष्ट (जूठा)

अस्या भारतभूमेरुत्तरेण कस्मिँश्चिदतिप्रसिद्धे नगर एकः श्रेष्ठी धर्म्मात्मा निवसति स्म। स च प्रतिदिनं नियतसमये समागताननाथानभ्यागतांश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भोजनदानेन प्रीणयति स्म । तस्य श्रेष्ठिनो गृहावलम्बिनीं रज्जुं धृत्वा तत्संलग्नां घण्टां यो वादयेत् तस्मै तस्य पाचकास्तयैव रज्ज्वा सह भोजनं बद्ध्वा प्रेषयन्ति स्म । अभ्यागताश्च वारं वारं भोजनं गृहीत्वान्यत्र कुत्रचिदागत्य भक्षयन्ति स्म । इतस्ततः प्रक्षिप्तेनावशिष्टेनोच्छिष्टभोजनेन तद्गृहसंरक्षकः श्वाप्यात्मानं यथा कथञ्चिद् अपालयत् ।

एवं बहुदिनानि कुर्वतस्तस्य शुनोऽतीव कष्टमभूत्, यतः स पर्य्याप्तं भोजनं न लब्धवान् । श्रेष्ठ्यपि तस्य-शुनोऽधिक भोजनदानेऽसावधानो नैव दत्तादरोऽभवत् । प्रतिदिनं दुर्बलीभूतेनातिकृशेन शुना चिन्तितं यदत्र मयापि स्वबुद्ध्यैव कार्य्यं साधयितव्यमिति । ततोऽर्थिभ्यो भोजनप्रदानकाले श्वापि शनैः शनैर्भोजनगृहनिकटं गत्वावलम्बमानां रज्जुं यथा कथञ्चित् पद्भ्यामुत्तोल्य घण्टामवादयत्, तेनचान्येऽइव यथेष्टं पर्याप्तं भोजनं प्राप्तवान् । एवं कुर्वति शुनि दशदिनानि व्यतीतानि अभवन् । एकदा पाचकैरेवं भोजनमाददानः श्वा दृष्टः, स्वामिने निवेदितश्च । तच्छ्रुत्वा स्वामिनात्मन-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवदोषमाशङ्क्य पश्चात्तापवता तद्दिनादारभ्यैव स स्वगृहरक्षकः श्वापि तथैव पोषितो यथान्येनाथा अभ्यागताश्च पोषिताः। तं च श्वानमप्यात्मनः पार्श्वमाहूयावदत् यदद्यारभ्य त्वमपि पर्याप्तं भोजनं प्राप्स्यसि। तवातिनैपुण्येनाहमतिप्रसन्नोस्मि ॥ तदुक्तम्—

औषधानां सुमन्त्राणाम्बुद्धेर्बुद्धिमतां सदा।

असाध्यं नास्ति लोकेऽत्र यद् ब्रह्माण्डस्य मध्यगम् ॥

इति ॥

(क) १. कया रीत्या अनाथाः श्रेष्ठिनो गृहाद्भोज्यं जगृहुः ?

२. श्वा कथं दुर्बलोऽभवत्, किञ्च पुनश्चकार येन सबलोऽभवत् ?

३. स्वामिना कथं व्यवहृतं शुना सह, पाचकेभ्यः कुक्कुरस्य कथां श्रुत्वा ?

४. अस्याः कथायास्तात्पर्य्यं लिख।

(ख) १. श्रेष्ठ्यपि तस्याधिकभोजनदाने दत्तादरो नैवाभवत्" इस वाक्य को सन्धिच्छेद करके लिखो।

२. वसति, प्रेषयति, आसीत्, प्राप, प्रीणयति—इनके धातु लिखो।

३. अवलम्बमाना, उत्तोल्य, पाचकः, भोजनम्, धृत्वा—इन पदों के धातु बताकर अर्थ करो।

(ग) इनका संस्कृत में अनुवाद करो:—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लटकती रस्सी को पाँवों से पकड़ कर हिलाया और घंटा बजाया।

जो कोई सेठ के घर बँधी हुई रस्सी को हिला कर घंटा बजाता था, भोजन पाता था।

बुद्धिमान् महात्माओं को जगत् में कुछ असाध्य नहीं॥

—०ः०ः०—

पाठः २६

चाक्रिकोष्ट्रौ।

चाक्रिक (तेली, कोल्हू वाला) अकालकुसुम (बेरुत का फूल)	वापगृहे (सोने के स्थान में) चिरस्थायिन् (देर तक रहने वाला)

एकस्यां रात्रौ कश्चिच्चाक्रिकः प्रबुद्धोऽपश्यत्, यदेकेनोष्ट्रेण स्वापगृहे स्वनासिका प्रवेशिता, उक्तञ्च "बहिरत्यन्तं शीतं वर्तते अतोऽहं स्वनासिकां तव गृहाभ्यन्तरे कर्तुं पृच्छामि।" तेन तत् स्वीकृतम्। पुनरुष्ट्रोऽग्रिमपादौ प्रवेशयितुमपृच्छत्। किं बहुना शनैःशनैस्तेन निजः सर्वएव देहः प्रवेशितः। चाक्रि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कश्चकितःशीघ्रमेव स्त्र सहवासिनमुष्ट्रमतीव क्लेशदायक ममन्यत्, यतस्तद् गृहस्थानं द्वयोर्निवासाय पर्याप्तं नालक्षयत् । अतस्तेन चाक्रिकेणोष्ट्रो दुःखान्निवेदितः "भोः ! बहिर्याहि ।" उष्ट्रेणोक्तम् "यदीदं गृहं तुभ्यं न रोचते, तर्हि त्वमेव बहिर्गच्छाहमत्रैव निवत्स्यामि ।"

दुष्टस्वभावा अप्येवंविधा, यतस्ते शनैः शनैरागच्छन्ति, चिरस्थायिनो भूत्वास्मान् कदापि न त्यजन्ति । दुष्टस्वभावेभ्यो हृदि वासं न दत्त । ते युष्मान् नाशयिष्यन्ति ॥ यदुक्तम्—

दुर्जनै रुच्यमानानि प्रियाणि च हितानि वा ।
अकालकुसुमानीव भयं संजनयन्ति वै ॥

(क) १. एकस्यां रात्रौ चाक्रिकः कथं जागरणं प्राप्तः ?
२. उष्ट्रेण किमुक्तम् ?
३. चाक्रिकेण किं कृतम् ?
४. पुनरुष्ट्रेण किं याचितम् ?
५. परिणामः कः ?
६. इदानीं चाक्रिकेण किं दृष्टम् ?
७. उष्ट्रं प्रति किं निवेदितञ्च ?
८. उष्ट्रोस्योत्तरं किम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

९. अस्याः कथायाः तात्पर्यं किम् ?

(ख) १. 'उष्ट्रेण स्वनासिका प्रवेशिता' 'तच्चाक्रिकेण स्वीकृतम्' 'पुनस्तेन ग्रीवाभ्यन्तरकरणाय पृष्टम्' 'चाक्रिकेण उष्ट्रो निवेदितः'—इन वाक्यों को कर्तृ वाच्य में लिखो ।

२. अपश्यत्, पृष्टम्, त्यजन्ति, सञ्जनयन्ति, इनके धातु बताओ ।

(ग) इनका संस्कृत में अनुवाद करो—

बुरी बातें भी इसी प्रकार धीरे धीरे आती हैं और प्रबल होकर हमारा नाश कर देती हैं ।

कोल्हू वाले ने ऊँट से कहा—तू बाहर निकल जा ।

ऊँट ने कहा—तू चला जा, मैं यहीं रहूँगा ।

पाठः २७

पातिव्रत्यम् ।

पातिव्रत्यं (पतिव्रतापन) अजानन्ती (न जानती हुई)

क्षीणायु (जिसकी उमर घट गई है) ।

यौवनस्था (जवान) सकृत् (एक बार) हैम (सोने का)

मद्रेष्वेकोऽश्वपतिनामातिधर्म्मात्मा राजासीत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्य ज्येष्ठया पत्न्या सावित्रीत्यभिधाना कन्या आसीत्। तां यौवनस्थां दृष्ट्वा पितेत्यवदत् पुत्रि ! स्वयमेवात्मगुणैः सदृशं भर्तारमन्विच्छ। अथ सा सावित्री हैमं रथमास्थाय सचिवैः सह राजर्षीणां रम्याणि वनानि जगाम। तत्र च द्युमत्सेनस्य राज्ञो गुणवन्तं सत्यवानिति नामानं पुत्रं मनसा वृणोत्।

तदैव तत्रागतेन महर्षिनारदेनोक्तम् "अजानन्त्या सावित्र्येदं महत्पापं कृतम्, यतः संवत्सरेण क्षीणायुः सत्यवान् देहत्यागं करिष्यति"। तच्छ्रुत्वा राज्ञोक्तम्—पुत्रि ! अयं तस्मिन् सत्यवति राज्ञि महान् दोषः सर्वान् गुणानतिक्रम्य स्थितः, अथ पुनर्गच्छान्यं वरं वृणीष्वेति। पितुर्वचनं श्रुत्वा सावित्र्येदमुक्तम्—

दीर्घायुरथवाल्पायु सगुणो निर्गुणोपिवा।
सकृद्वृतो मया भर्त्ता न द्वितीयं वृणोम्यहम् ॥इति॥

(क) १. इयं कस्याः कथा वर्त्तते ?

२. सावित्री कस्य सुताऽऽसीत् ?

३. पिता तां किमवदत् ?

४. पितु राज्ञां लब्ध्वा किं कृतं सावित्र्या ?

५. तत्रागतेन नारदेन किमुक्तम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६. पुनः किमुक्तं राज्ञा तत्रगतां सावित्रीं प्रति ?

७. सावित्र्या उत्तरे किं भणितम् ।

(ख) १. इन वाक्यों को अपनी संस्कृत में वर्णन करो—
'पिता यौवनस्थां तामित्यकथयत्' । 'संवत्सरेण क्षीणायुः सत्यवान् देहत्यागं करिष्यति ।'

२. पाठ के अन्त के श्लोक की सन्धियां खोलो और अर्थ बताओ ।

(ग) इनका संस्कृत में अनुवाद करो—

मद्रदेश में अश्वपति राजा के यहां सावित्री नाम की कन्या थी ।

यौवन को प्राप्त होकर उसने द्युमत्सेन राजा के बेटे सत्यवान को बरा ।

नारद ने कहा कि यह लड़का तो इस वर्ष के पीछे मर जायगा ।

सावित्री ने कहा चाहे वह कैसा ही हो, मैं तो उसे एक बार मन से वर चुकी, अब वही मेरा पति होगा, दूसरा नहीं ॥

पाठः २८

विद्या ।

पात्रता (योग्यता) शुश्रूषा (सेवा) पुष्कल (बहुत) प्रतिपत्ति (ऐश्वर्य) विशिष्यते (खास समझा जाता है) ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्म्मं ततः सुखम् ॥१॥
विद्या शस्त्रञ्च शास्त्रञ्च द्वे विद्ये प्रतिपत्तये ।
आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा ॥२॥
गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थं नैव कारणम् ॥३॥
विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥४॥
पण्डिते च गुणा सर्वे मूर्खे दोषाश्च केवलम् ।
तस्मान् मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते ॥५॥

(क) १. विद्याया लाभान् वर्णय ।
   २. विद्या किं विधास्ति ?
   ३. विद्या कथं प्राप्यते ?
   ४. विदुषो नृपस्य चासादृश्यं वद ।
   ५. पंडितमूर्खयोः को भेदः ?

(ख) १. विनयः, प्रतिपत्तिः, प्राज्ञः इनके अर्थ बताओ और बताओ वे किन धातुओं से बने हैं ?
   २. पिछला अर्थात् पाँचवाँ श्लोक लिखो और उसके अर्थ बताओ ।
   ३. त्व और ता अन्त में लगाने से जो भाववाचक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शब्द बनते हैं, उनके उदाहरण दो और उनका छोटे छोटे वाक्यों में प्रयोग करो।

(ग) इनका संस्कृत में अनुवाद करो—

विद्या मनुष्य को नम्र, पात्र, धनी और धार्मिक बनाती है।

विद्या गुरु की सेवा से प्राप्त होती है।

विद्वान् की सब जगह इज्जत होती है और राजा की उसके देश में ही।

बुद्धिमान शत्रु मूर्ख मित्र से अच्छा होता है॥

पाठः २६

कृतस्य फलं भोक्तव्यम्।

जाग्रत् (जागता हुआ) रौप्यमुद्रा (रुपया)

एको बालक एकस्मिन् स्थानेऽन्नं खादति स्म। एकं सुप्तं श्वानं दृष्ट्वा तमुच्चैराह्वयत्, किञ्चिन्मात्रमन्नं हस्ते गृहीत्वादर्शयच्च। जाग्रत् श्वा तदन्नं दृष्ट्वाधावत्, बालकस्य समीपमागच्छच्च। तेन बालकेनान्नमपाहृत्य तन्मुखे यष्ट्या प्रहृतम्। दीनःश्वाक्रन्ददधावच्च।

एकेन भद्रपुरुषेण निजगृहादिदं सर्वं वृत्तं दृष्टम्। अतस्तमेव बालकं निकटमाहूय स रौप्यमुद्रामदर्शयत।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदा बालकेन मुद्रां ग्रहीतुं हस्तः प्रसारितस्तदा तेन पुरुषेण द्वितीयहस्तेन तस्य पृष्ठे दृढं प्रहृतम्, येन बालको भृशं रुदित्वाकथयत्—"किमर्थं भवद्भिरहं पृष्ठे ताडितो, मया च मुद्रापि स्वयं न याचिता"। भद्रपुरुषेणोक्तम्—"किमर्थं त्वया निरपराधः श्वा दण्डितः। यथा त्वया कृतं, तथा तस्य फलं भुक्तम्।"

यद्यपि जन्तवोऽवाचःऽसन्ति परन्तेऽपि वयमिव जीवनं धारयन्ति। अतस्तेषु दयैव कर्तव्या। तदुक्तम्—

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः॥

अपरञ्च—

प्रवर्ततां मनुजहिताय सज्जनो
दयावति द्रविणततिर्न हीयताम्।

(क) १. बालकेन किं कृतम्?

२. एकेन भद्रपुरुषेण कथं स बालकस्ताडितः शिक्षितश्च?

३. अवाग्भिर्जन्तुभिः सह कथं वर्त्तनीयम्?

(ख) १. 'तेन तन्मुखे प्रहृतम्' 'एकेन पुरुषेणेदं दृष्टम्' 'बालकेन हस्तः प्रसारितः' 'तेन तस्य पृष्ठे' प्रहृतम्' भवद्भिरहं किमर्थं ताडितः, मया मुद्रापि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न याचिता' 'पुरुषेणोक्तम्—त्वया किमर्थं श्वा दण्डितः, यथा त्वया कृतं तथा तस्य फलं भुक्तम्' इनके अर्थ बताओ। इन वाक्यों को और तरह से लिख कर दिखलाओ।

(ग) इनका संस्कृत में अनुवाद करो—

एक लड़के ने पास सोए हुए कुत्ते को जगाया। उसने उसे रोटी का टुकड़ा दिखाया। जब पास आया तो उसके मुँह पर लकड़ी मारी। एक भद्र पुरुष ने एक रुपया दिखाया और लड़के को अपने पास बुलाया।

जब लड़के ने हाथ पसारा, तो उसके लकड़ी मारी। बेज़बान जानवरों पर दया करनी चाहिये॥

पाठः ३०

वरटामधुमक्षिके।

वरटा (भिड़)
संलाप (बातचीत)
क्रूरता (निर्दयता)
सविस्तरं (विस्तार से)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एकदा वरटामधुमक्षिकयोः संवादोऽभवत् । वरटा मधुमक्षिकामकथयत् "सखि ! किं त्वं मामिदं कथयितुं शक्नोषि यल्लोका मया सह किमर्थं क्रूरतया व्यवहरन्ति त्वया सहचातिप्रेम्णा । आवां द्वे एवमक्षिकाजातीये स्वः उभे पक्षवत्यौ, उभे एव मधुप्रिये, द्वे एव पीडादातॄन् दष्टुं समर्थे स्वः । कथं पुनर्लोका मे द्विषन्ति, मारयन्ति च माम् । तवार्थे चोच्चमानि स्थानानि निर्म्माय ददति, प्रेम्णा पालयन्ति च त्वाम् । शीतागमनसमये तव रक्षां कुर्वन्ति । अत्र किं कारणमस्तीति मां त्वं सविस्तरं वद ।"

मधुमक्षिका वरटां प्रत्युक्तवती—"सखि ! मनुष्यस्य कञ्चिदप्यर्थं न साधयसि, केवलं दशसि, तेषां वस्तूनि च नाशयसि, अतस्ते त्वां द्रष्टुमपि नेच्छन्ति । अहं च समस्तं दिनं सुकृत्यं करोमि, मधुरेण वस्तुना स्वगृहं पूरयामि केवलं लोकाय । इदमेवोत्तरं तव प्रश्नस्य ॥

॥ तात्पर्य्यम् ॥

परोपकरणं कायादसारात् सारमाहरेत् ।
परोपकारिणा चेत्थं प्रेम कुर्वन्ति साधवः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाठः ३१

कृतज्ञो हस्ती ।

पुरु (एक राजे का नाम) ऊहति (समझता है)
करी (हाथी) अपहर्तृ (लेने वाला) उदीरित (कहा हुआ)
हय (घोड़ा) देशित (हुकम दिया हुआ) ।

एकदा पुरोराज्ञः सम्राजा अलक्षेन्द्रेण सहातीव युद्धमभवत् । युध्यमानः शस्त्रैराहतः शरैर्विद्धश्च पुरुर्यदा हस्तिनोऽपतत्, तदा विश्वस्तः कृतज्ञश्च करी तस्योपांत एव स्थितवान् । सम्राट्प्रयुक्तान् पुरोर्देहात् भूषणान्यमूल्यवस्त्राणि चापहर्तृन् सैनिकांश्च न्यवारयत् । पुनर्यत्नेनं राजानं स्वशुण्डादण्डे धृत्वा स्वस्कन्धमारोप्यं धावन् राजस्थानं प्राप । स्वयञ्च सैनिकैः सह युध्यमानोऽनेकविधैः शस्त्रैर्विद्धस्तस्मिन्नेव संग्रामेऽम्रियत ॥

॥ तात्पर्य्यम् ॥

उदीरितोऽर्थः पशुनापि गृह्यते ।
हयाश्च नागाश्च वहन्ति देशिताः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनुक्तमप्यूहति पण्डितो जनः ।

परेङ्गितज्ञानफला हि बुद्धयः ॥

(क) १. पुरुः कोऽभवत् ?

२. केन सह तस्य युद्धं जातम् ?

३. पुरौ पतिते किं कृतं हस्तिना ?

(ख) १. इन समस्त शब्दों के अर्थ करो—

'अनुकूलाचरणानि' 'स्वशुण्डादण्डे' 'राजस्थानम्' 'अनेकविधैः' ।

२. 'पशुनापि अर्थः गृह्यते' इसे कर्तृवाच्य बना कर लिखो ।

(ग) इनका संस्कृत में अनुवाद करो—

राजा हाथी पर से गिर पड़ा और हाथी पास ही खड़ा रहा।

हाथी ने राजा को सूंड पर उठा लिया और उसे उस की राजधानी में पहुंचा दिया ।

हाथी को शस्त्रों से जख्म लगे और वहीं लड़ाई में मर गया ।

हाथी बड़ा कृतज्ञ पशु है ॥

—००:०:००—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाठः ३२

प्रत्युत्पन्नमतिर्भृत्यः ।

विशालमन्दिरभित्ति (बड़े मकान की दीवार) प्रत्युत्पन्नमति (बात को तत्काल समझकर करने वाला) कठिनी (खड़िया) मर्दयित्वा (मलकर) विज्ञ (चतुर, पण्डित) ।

एकश्चित्रकारः कस्याश्चिदतीवविशालमन्दिरभित्तेश्चित्रं चित्रयन्नासीत् । तस्यैकः प्रत्युत्पन्नमतिर्नाम भृत्योऽपि तस्मिन्नेव पाटीरे स्थितोऽभवत् । चित्रकारो दूरान्मम चित्रं कथं दृश्यते, लोका मम चित्रं स्तोष्यन्ति न वेति ज्ञातुं संमुखाभ्यामेव पद्भ्यां मन्दं मन्दं विवर्त्तमानस्तथाभवद्यथाधुनैव पाटीरान्निपत्य खण्डशोभविष्यति, इत्यनुभवता भृत्येन शीघ्रमेव काठिनीं गृहीत्वा तच्चित्रोपरि मर्दयित्वा तद्दर्शनानर्हमकरोत् । तद्दृष्टवातिकुपितश्चित्रकारस्तं भृत्यं ताडयितुमधावत् । तदा भृत्येनोक्तम्-"स्वामिन्! साहसं न कर्त्तव्यं। पूर्वं मम चित्रमर्दन हेतुं श्रुत्वा पुनर्यथोचितं भवता कर्तव्यम्"। विज्ञः स्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भ्यवदत्—'कथय तावद् मनोगतं वृत्तम् ।' किङ्करेणोक्तम्–"स्वामिन् ! भवान् स्वचित्रस्य सौंदर्य्यं पश्यन् पाटीरादधःपतित्वा गतप्राणःखण्डशो भवितुमासीः इतिभयाद् मयैतत्कर्म्म कृतं यतः स्वामी धावन् चित्रोपान्तमुपतिष्ठेत्" । इदं सर्वं श्रुत्वा विचार्य्य च तस्मै भृत्याय चित्रकारः स्वर्णपदकमेकं पारितोषिकरूपेणायच्छत् ।। तात्पर्य्यम्—

कृतज्ञःभृत्यवर्गश्च दुःखेनैवोपलभ्यते ।
अकृतज्ञः कृतघ्नश्च शीघ्रमेव विनश्यति ।।

(क) १. चित्रकारः किं कुर्वन्नासीत् ?
२. तेन कुत्र गतं किमर्थञ्च ?
३. तस्य भृत्येन किं दृष्टं कृतञ्च ?
४. कुपितः स्वामी किं कर्त्तुमुद्यतः ?
५. भृत्येन किमुक्तं ? स्वामिनाच किं कथितम् ?

(ख) १. इन वाक्यों का हिन्दी में अनुवाद करोः—
"एकश्चित्रकारः विशालमन्दिरभित्तेश्चित्रं चित्रयन्नासीत्" "मम कार्य्यं दूरात् कथं दृश्यते" "इति हेतुना संमुखाभ्यामेव पद्भ्यां न्यवर्तत" पाटीरस्य वृतेरभावान्महद्भयमासीत् । एकेनैवान्येन् पदेन स खण्डशो भवेत्"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'तस्य भृत्येन तच्चित्रं कठिन्या मर्दितं । कुपितश्च स्वामी तं ताडयितुमुपागतः" ।

"पश्चात् स्वामी तस्य भृत्यस्य बहुधन्यवाद-मकरोत्"

"भृत्येन तच्चितं कठिन्या मर्दितमतस्तत्प्राण-रक्षा जाता"

आपत्तिकाले य उचितोपायं चिन्तयति करोति च स प्रत्युत्पन्नमतिर्भवति" ।

(ग) संस्कृत में अनुवाद करो—

एक चित्रकार चित्र बना रहा था ।

नौकर ने चित्र पर खड़िया फेर दी ।

चित्रकार बड़ा क्रुद्ध हुआ और उसे मारने को दौड़ा ।

पाठ ३३

लोभ निन्दा ।

छेत्तृ (काटने वाला)

बहुश्रुतः (जिसने बहुत कुछ देखा सुना हो)

लोभात् क्रोधः प्रभवति लोभादिच्छा प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥१॥
सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

छेत्तारः संशयानाञ्च क्लिश्यन्ते लोभमोहिताः ॥२॥

असम्भवं हेममृगस्य जन्म
तथापि रामो लुलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले
धियोऽपि पुंसां मलिनी भवन्ति ॥३॥

॥ तात्पर्य्यम् ॥

लोभी क्रोधेन कामेन मोहेन च ग्रस्तो भवति, पापञ्चकरोत्यत एव नाशं प्राप्नोति । लोभमोहिता विद्वांसोऽपि दुःखिता भवन्ति; यथा धीमान् रामः सर्वज्ञोऽपि लोभान्वितः सन् असम्भवस्य सुवर्ण-मृगस्य-पश्चाद् धावतिस्म ॥

(क) १. 'धारयत्' और 'छेत्तृ' शब्दों की सारो विभक्तियां लिखो ।

२. इनके अर्थ लिखो—'बहुश्रुताः' "सुमहान्त्यपि शास्त्राणि धारयन्तः संशयानाञ्च छेत्तारः लोभ मोहिता सन्तः क्लिश्यन्ते" ।
"हेममृगस्य जन्मासम्भवं तथापि रामः तस्मै हेममृगाय लुलुभे" ।
"प्रायः जनः विनाशकाले विपरीत बुद्धिर्भवति"

३. इन नीचे लिखे शब्दों के अर्थ लिखो:—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपत्ति, आपत्ति, संपत्ति, उत्पत्ति, व्युत्पत्ति ।

(ख) इनका संस्कृत में अनुवाद करो:—

लोभी जन नाश को प्राप्त होता है ।

पण्डित और विद्वान सन्देहों को दूर करते हैं ।

विनाश काल में मति फिर जाती है ।

कहीं सोने के हिरन का जन्म हो सकता है !

॥ इति ॥

Printed by L. Moti Ram, Manager, at the Mufid-i-'Am Press, situated at Chatterji Road, Lahore and published by Rai Sahib Lala Sohan Lal, Managing Proprietor, Rai Sahib M. Gulab Singh & Sons, Lahore.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh